॥ श्रीललितासहस्रनामस्तोत्रम् ॥

ஸ்ரீ லலிதா ஸஹஸ்ரநாம ஸ்தோத்ரம்

DHANVANTARI PUBLISHERS
3, NORTON 3RD LANE
Dh..
..PORE :: MADRAS
MYLAPOR
Registered] 1953 [Rs. 0—12—0
Copyright Regi..

श्रीः

॥ श्री ललिता सहस्रनाम ॥

ஸ்ரீ லலிதா ஸஹஸ்ர நாமம்

முதல் பாகம்

ஸாஹித்ய வேதாந்த சிரோமணி, ஸாஹித்ய விசாரத

வழுத்தூர் ஸ்ரீ ராஜகோபால சாஸ்திரிகள்

எழுதிய விரிவுரையுடன்

DONATED TO
TTD CENTRAL LIBRARY

DHANVANTARI PUBLISHERS

3, NORTON 3RD LANE

MYLAPORE :: MADRAS

Copyright Registerd] 1953 [Rs. 0-12-0

முகவுரை

தேவிபரமான ஸ்தோத்திரங்களும் சாஸ்திரங்களும் ஸம்ஸ்கிருதத்தில் கடலைப்போல் பரந்திருக்கின்றன. ஸ்ரீசங்கராசாரியஸ்வாமிகள் தேவிபூஜை செய்து பக்தர்களுக்கு நல்வழி காட்டியதோடு அவர்கள் ஸ்தாபித்த பீடங்களில் முக்கியமானவற்றில் தேவியையே முக்கியமான மூர்த்தியாகப் பிரதிஷ்டை செய்திருக்கிறார்கள். வேறு இடங்களில் வாமாசார வகையில் அம்பிகையைப் பூஜை செய்கிறவர்கள் இருக்கிறார்கள். வங்காளத்தில் தந்திரங்களின்படி உபாஸனை செய்யும் பக்தர்கள் இன்றும் பலர் உண்டு. ஆனால் தமிழ் நாட்டில் ஸ்ரீவித்யையை உபாஸனை செய்கிறவர்கள் அத்வைத சித்தாந்தத்தையே லக்ஷ்யமாகக் கொண்டு ஸாத்விக முறையில் அம்பிகையை வழிபட்டு வருகிறார்கள். அவர்கள் லலிதா ஸஹஸ்ரநாம பாராயணமும், அர்ச்சனையும் செய்யத் தவறுவதே இல்லை.

ஸ்ரீ லலிதா ஸஹஸ்ரநாமம் மற்ற ஸஹஸ்ரநாமங்களைப் போன்றது அன்று அம்பிகையின் ரூப வருணனையையும், சக்தியையும், லீலைகளையும், தத்துவங்களையும், ஒழுங்காகச் சொல்வது இது. பெரிய நாமங்கள் பலவற்றை இதில் காணலாம். இந்த நாமங்களில் காவியச் சுவை ததும்பும். இதற்கு ஸ்ரீ பாஸ்கரராயர் என்ற பெரியார் விரிவான பாஷ்யம் ஒன்றை எழுதியிருக்கிறார். மிகவும் அற்புதமான ஸஹஸ்ரநாமம் என்ற செய்தியை அந்த விரிவுரையிலிருந்து தெரிந்துகொள்ளலாம்.

இறைவன் நாமம், ரூபம், குணம் ஆகியவற்றைக் கடந்து நிற்பவன். அவனுடைய நிலையை இந்திரிய வசப்பட்டவர்கள் அறிய முடியாது. வாக்கு மனங்கடந்த வள்ளலாக இருந்தாலும் தன்னுடைய திருவருளுக்கு ஏங்கிநிற்கும் பக்தர்களுக்கு அருள்செய்யும் பொருட்டுத் திவ்யமங்களரூபமுடையவனாகக் காட்சி கொடுக்கிறான். அவன் அருளையே கண்ணாகக் கொண்டு காண்கின்ற பக்தர்கள் இறைவனுடைய திருக்கோலங்களைத் தரிசித்துத் தாம்பெற்ற இன்பத்தை மற்றவர்களும் பெறும்படி செய்கிறார்கள்.

மைப்படிந்த கண்ணாளுந் தானும் கச்சி
மயானத்தான் வார்சடையான் என்னின் அல்லால்
ஒப்புடையன் அல்லன் ஒருவன் அல்லன்
ஓரூர னல்லன்ஓர் உவமன் இல்லி
அப்படியும் அந்நிறமும் அவ்வண்ணமும்
அவனருளே கண்ணாகக் காணின் அல்லால்
இப்படியன் இந்நிறத்தன் இவ்வண் ணத்தன்
இவன்இறைவன் என்றெழுதிக் காட்டொ ணாதே

என்பது அப்பர் வாக்கு. அப்படி ஆன்றோர்கள் கண்டு தரிசித்த திருமேனிகளைப் பற்றிய வருணனைகளைப் புராணங்களில் காணலாம். இறைவனுடைய குணங்கள், திருமேனி, அருட்செயல்கள், பராக்கிரமச் செயல்கள் ஆகியவற்றை நினைப்பதற்காகவே நாமங்கள் ஏற்பட்டன. அவைகள் கணக்கிலடங்காதவை. ஆனாலும் ஏதேனும் ஒருமுறைப்படுத்த வேண்டுமென்று பெரியோர்கள் அஷ்டோத்தர

மென்றும், திரிசதி என்றும், ஸஹஸ்ரநாமம் என்றும் வகுத்துப் பாராயணத்துக்கு அநுகூலமாகச் செய்திருக்கிறார்கள். நாமம் இல்லாத பரம்பொருளை நினைக்கவும் வாழ்த்தவும் இந்த நாமங்கள் பயன்படுகின்றன. ஸஹஸ்ரநாமங்களைச் சொல்வதனால் நம்முடைய மனம் குவிகிறது, இறைவனுடைய குணகணங்களில் மனம் ஒன்றிப்போய்க் கரைகிறது; கரைந்து உருகி வேறு நினைப்பின்றி நின்றுவிடுகிறது.

ஒருநாமம் ஓர்உருவம் ஒன்றும்இலார்க்கு ஆயிரம்
திருநாமம் பாடிநாம் தெள்ளேணம் கொட்டாமோ

என்று மாணிக்கவாசக ஸ்வாமிகள் ஸஹஸ்ரநாமத்தைப் பற்றிச் சொல்கிறார்.

இந்தப் புத்தகத்தில் லலிதா ஸஹஸ்ரநாமத்தின் மூலம் ஸம்ஸ்கிருதத்திலும் தமிழிலும் அமைக்கப் பெற்றிருக்கின்றன. ஸ்ரீ லலிதாம்பிகையின் திருவருளால் அன்பர்களின் பக்தியை வளர்க்கவும் அவர்களுடைய பாராயண ஆராதனைகளுக்கு உரிய கருவியாக அமையவும் இந்தப் புத்தகம் பயன்பட வேண்டுமென்பதே எங்கள் கருத்து.

பலமுறை திருத்தம் செய்து அனுப்பினாலும் சோர்வின்றித் திருத்தியனுப்பி உதவி செய்யும் நாஷனல் ஆர்ட் பிரஸ்காரர்களுடைய ஒத்துழைப்பினால் எங்கள் வெளியீடுகள் சிறப்பாக அமைகின்றன என்பதை மகிழ்ச்சியுடன் தெரிவித்துக்கொள்கிறோம்.

மாம்பலம் ஸ்ரீ ராமகிருஷ்ண மிஷன் ஹைஸ்கூலில் ஸம்ஸ்கிருத பண்டிதராக இருக்கும் ஸாஹித்ய வேதாந்த சிரோமணி ஸாஹித்ய விசாரத வழுத்தூர் ஸ்ரீ ராஜகோபால சாஸ்திரிகள் பாஸ்கர ராயருடைய பேருரையைப் பின்பற்றி பாராயணம் செய்கிறவர்கள் பொருளைத் தெரிந்து கொள்வதின் பொருட்டு எழுதிய தமிழ் உரை இரண்டாவது பாகமாக பிரசுரிக்கப்படும். இந்தப் புத்தகத்தின் அச்சுத் தாள்களைத் திருத்தி யுதவும் உபகாரத்தையும் செய்துள்ள அவர்களுக்கு எங்கள் நன்றியைத் தெரிவித்துக்கொள்கிறோம்.

பதிப்பாளர்

ஸ்ரீ:

ஸ்ரீ லலிதாமஹாத்ரிபுர ஸுந்தர்யை நம:

ஸ்ரீ லலிதா ஸஹஸ்ரநாம ஸ்தோத்ரம்

(பூர்வ பாகம்)

அகஸ்த்ய உவாச—

அச்வானன மஹாபுத்தே ஸர்வ சாஸ்த்ர விசாரத |
கதிதம் லலிதா தேவ்யா: சரிதம் பரமாத்புதம் ||
பூர்வம் ப்ராதுர்பவோ மாது: தத: பட்டாபிஷேசனம் |
பண்டாஸுரவதச் சைவ விஸ்தரேண த்வயோதித: ||
வர்ணிதம் ஸ்ரீபுரஞ் சாபி மஹாவிபவ விஸ்தரம் |
ஸ்ரீமத் பஞ்சதசாக்ஷர்யா மஹிமா வர்ணிதஸ் ததா ||
ஷோடாந்யாஸாதயோ ந்யாஸா ந்யாஸகண்டே ஸமீரிதா: |
அந்தர்யாக க்ரமச்சைவ பஹிர்யாக க்ரமஸ்ததா |
மஹாயாக க்ரமச்சைவ பூஜாகண்டே ப்ரகீர்த்திதா: ||
புரச்சரண கண்டே து ஜபலக்ஷணமீரிதம் |
ஹோமகண்டே த்வயா ப்ரோக்தோ ஹோமத்ரவ்ய விதிக்ரம: ||
சக்ர ராஜஸ்ய வித்யாயா: ஸ்ரீதேவ்யா தேசிகாத்மனோ: |
ரஹஸ்யகண்டே தாதாத்ம்யம பரஸ்பர முதீரிதம் ||
ஸ்தோத்ரகண்டே பஹுவிதா: ஸ்துதய: பரிகீர்த்திதா: |
மந்த்ரிணீ தண்டினீ தேவ்யோ: ப்ரோக்தே நாமஸஹஸ்ரகே |
ந து ஸ்ரீலலிதா தேவ்யா: ப்ரோக்தம் நாமஸஹஸ்ரகம் ||
தத்ர மே ஸம்சயோ ஜாதோ ஹயக்ரீவ தயாநிதே |
கிம் வா த்வயா விஸ்ம்ருதம் தத் ஜ்ஞாத்வா வா ஸமுபேக்ஷிதம் ||

॥ श्रीः ॥

॥ श्रीललितामहात्रिपुरसुन्दर्यै नमः ॥

॥ श्रीललितासहस्रनामस्तोत्रम् ॥

(पूर्वभागः)

अगस्त्य उवाच—

अश्वानन महाबुद्धे सर्वशास्त्रविशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥
पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनम् ।
भण्डासुरवधश्चैव विस्तरेण त्वयोदितः ॥
वर्णितं श्रीपुरञ्चापि महाविभवविस्तरम् ।
श्रीमत्पञ्चदशाक्षर्या महिमा वर्णितस्तथा ॥
षोढा न्यासादयो न्यासा न्यासखण्डे समीरिताः ।
अन्तर्यागक्रमश्चैव बहिर्यागक्रमस्तथा ॥
महायागक्रमश्चापि पूजाखण्डे प्रकीर्तितः ।
पुरश्चरणखण्डे तु जपलक्षणमीरितम् ॥
होमखण्डे त्वया प्रोक्तो होमद्रव्यविधिक्रमः ।
चक्रराजस्य विद्यायाः श्रीदेव्या देशिकात्मनोः ॥
रहस्यखण्डे तादात्म्यं परस्परमुदीरितम् ।
स्तोत्रखण्डे बहुविधाः स्तुतयः परिकीर्तिताः ॥
मन्त्रिणीदण्डिनीदेव्योः प्रोक्ते नामसहस्रके ।
न तु श्रीललितादेव्याः प्रोक्तं नामसहस्रकम् ॥
तत्र मे संशयो जातो हयग्रीव दयानिधे ।
किं वा त्वया विस्मृतं तज्ज्ञात्वा वा समुपेक्षितम् ॥

மம வா யோக்யதா நாஸ்தி ஶ்ரோதும் நாமஸஹஸ்ரகம் |
கிமர்த்தம் பவதா நோக்தம் தத்ர மே காரணம் வத ||

ஸூத உவாச —

இதி ப்ருஷ்டோ ஹயக்ரீவோ முனினா கும்பஜன்மனா |
ப்ரஹ்ருஷ்டோ வசனம் ப்ராஹ தாபஸம் கும்பஸம்பவம் ||

ஶ்ரீ ஹயக்ரீவ உவாச —

லோபாமுத்ராபதே அகஸ்த்ய ஸாவதானமனா: ஶ்ருணு |
நாம்னாம் ஸஹஸ்ரம் யன்னோக்தம் காரணம் தத்வதாமி தே ||
ரஹஸ்யமிதி மத்வாஹம் நோக்தவானஸ்மி தே ந சான்யதா |
புனஶ்ச ப்ருச்சதே பக்த்யா தஸ்மாத்தத்தே வதாம்யஹம் ||
ப்ரூயாச்சிஷ்யாய பக்தாய ரஹஸ்யமபி தேஶிக: |
பவதா ந ப்ரதேயம் ஸ்யாத் அபக்தாய கதாசன ||
ந ஶடாய ந துஷ்டாய நாவிஶ்வாஸாய கர்ஹிசித் |
ஶ்ரீமாத்ருபக்தியுக்தாய ஶ்ரீவித்யாராஜவேதினே ||
உபாஸகாய ஶுத்தாய தேயம் நாமஸஹஸ்ரகம் |
யானி நாமஸஹஸ்ராணி ஸத்ய: ஸித்திப்ரதானி வை ||
தந்த்ரேஷு லலிதாதேவ்யாஸ் தேஷு முக்யமிதம் முனே |
ஶ்ரீவித்யைவ து மந்த்ராணாம் தத்ர காதிர்யதா பரா ||
புராணாம் ஶ்ரீபுரமிவ ஶக்தீனாம் லலிதா யதா |
ஶ்ரீவித்யோபாஸகானாம் ச யதா தேவ: பரஶ்ஶிவ: ||
ததா நாமஸஹஸ்ரேஷு பரமேதத் ப்ரகீர்த்திதம் |
யதாஸ்ய படனாத்தேவீ ப்ரீயதே லலிதாம்பிகா ||
அன்யநாமஸஹஸ்ரஸ்ய பாடான்ன ப்ரீயதே ததா |
ஶ்ரீமாது: ப்ரீயதே தஸ்மாத் அனிஶம் கீர்த்தயேதிதம் ||
பில்வபத்ரைஶ்சக்ரராஜே யோ அர்சயேத் லலிதாம்பிகாம் |
பத்மைர்வா துளஸீபுஷ்பைர் ஏபிர் நாமஸஹஸ்ரகை: ||

मम वा योग्यता नास्ति श्रोतुं नामसहस्रकम् ।
किमर्थं भवता नोक्तं तत्र मे कारणं वद ॥

सूत उवाच—
इति पृष्टो हयग्रीवो मुनिना कुम्भजन्मना ।
प्रहृष्टो वचनं प्राह तापसं कुम्भसम्भवम् ॥

श्रीहयग्रीव उवाच —
लोपामुद्रापतेऽगस्त्य सावधानमनाः शृणु ।
नाम्नां सहस्रं यन्नोक्तं कारणं तद्वदामि ते ॥
रहस्यमिति मत्वाहं नोक्तवांस्ते न चान्यथा ।
पुनश्च पृच्छते भक्त्या तस्मात्तत्ते वदाम्यहम् ॥
ब्रूयाच्छिष्याय भक्ताय रहस्यमपि देशिकः ।
भवता न प्रदेयं स्यादभक्ताय कदाचन ॥
न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ।
श्रीमातृभक्तियुक्ताय श्रीविद्याराजवेदिने ॥
उपासकाय शुद्धाय देयं नामसहस्रकम् ।
यानि नामसहस्राणि सद्यः सिद्धिप्रदानि वै ॥
तन्त्रेषु ललितादेव्यास्तेषु मुख्यमिदं मुने ।
श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा ॥
पुराणां श्रीपुरमिव शक्तीनां ललिता यथा ।
श्रीविद्योपासकानां च यथा देवः परः शिवः ॥
तथा नामसहस्रेषु परमेतत्प्रकीर्तितम् ।
यथास्य पठनाद्देवी प्रीयते ललिताम्बिका ॥
अन्यनामसहस्रस्य पाठान्न प्रीयते तथा ।
श्रीमातुः प्रीयते तस्मादनिशं कीर्तयेदिदम् ॥
बिल्वपत्रैश्चक्रराजे योऽर्चयेल्ललिताम्बिकाम् ।
पद्मैर्वा तुलसीपुष्पैरेभिर्नामसहस्रकैः ॥

ஸத்ய ப்ரஸாதம் குருதே தஸ்ய ஸிம்ஹாஸனேஸ்வரீ ।
சக்ராதி ராஜ மப்யர்ச்ய ஜப்த்வா பஞ்சதஸாக்ஷரீம் ॥
ஜபாந்தே கீர்தயேந் நித்யம் இதம் நாமஸஹஸ்ரகம் ।
ஜபாபூஜாத்ய ஸக்தஸ்சேத் படேந்நாம ஸஹஸ்ரகம் ॥
ஸாங்கார்சனே ஸாங்கஜபே யத்பலம் ததவாப்னுயாத் ।
உபாஸனே ஸ்துதிரன்யா படேதப்யுதயோ ஹி ஸ
இதம் நாமஸஹஸ்ரம்து கீர்தயேந் நித்யகர்மவத் ।
சக்ரராஜார்சனம் தேவ்யா ஜபோ நாம்னாம் ச கீர்த்தனம் ॥
பக்தஸ்ய க்ருத்யமேதாவத் அன்யதப்யுதயம் விது ।
பக்தஸ்யாவஸ்யகமிதம் நாம ஸாஹஸ்ர கீர்த்தனம் ॥
தத்ர ஹேதும் ப்ரவக்ஷ்யாமி ஸ்ருணு த்வம் கும்பஸம்பவ ।
புரா ஸ்ரீலலிதா தேவீ பக்தானாம் ஹிதகாம்யயா ॥
வாக்தேவதா வஸின்முக்யா ஸமாஹூயேதமப்ரவீத் ।
வாக்தேவதா வஸின்யாத்யா ஸ்ருணுத்வம் வசனம் மம ॥
பவந்த்யோ மத்ப்ரஸாதேன ப்ரோல்லஸத் வாக்விபூதய ।
மத்பக்தானாம் வாக்விபூதி ப்ரதானே வினியோஜிதா ॥
மச்சக்ரஸ்ய ரஹஸ்யஜ்ஞா மம நாமபராயணா ।
மம ஸ்தோத்ரவிதானாய தஸ்மாதாஜ்ஞாபயாமி வ ॥
குருத்வ மங்கிதம் ஸ்தோத்ரம் மம நாமஸஹஸ்ரகை ।
யேன பக்தை ஸ்துதாயா மே ஸத்ய ப்ரீதி பரா பவேத் ॥
இத்யாஜ்ஞப்தாஸ்ததோ தேவ்ய ஸ்ரீதேவ்யா லலிதாம்பயா ।
ரஹஸ்யைர் நாமபிர் திவ்யை சக்ருஸ் ஸ்தோத்ரமனுத்தமம் ॥
ரஹஸ்ய நாமஸாஹஸ்ரம் இதி தத்விஸ்ருதம் பரம் ।
தத கதாசித் ஸதஸி ஸ்தித்வா ஸிம்ஹாஸனேம்பிகா ॥
ஸ்வஸேவாவஸரம் ப்ராதாத் ஸர்வேஷாம் கும்பஸம்பவ ।
ஸேவார்த்தமாகதா தத்ர ப்ருஹ்மாணீ ப்ருஹ்மகோடய: ॥

सद्यः प्रसादं कुरुते तस्य सिंहासनेश्वरी ।
चक्राधिराजमभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ॥
जपान्ते कीर्तयेन्नित्यमिदं नामसहस्रकम् । ४५
जपपूजाद्यशक्तश्चेत्पठेन्नामसहस्रकम् ॥
साङ्गार्चने साङ्गजपे यत्फलं तदवाप्नुयात् ।
उपासने स्तुतीरन्याः पठेदभ्युदयो हि सः ॥
इदं नामसहस्रं तु कीर्तयेन्नित्यकर्मवत् ।
चक्रराजार्चनं देव्या जपो नाम्नां च कीर्तनम् ॥ ५०
भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः ।
भक्तस्यावश्यकमिदं नामसाहस्रकीर्तनम् ॥
तत्र हेतुं प्रवक्ष्यामि शृणु त्वं कुम्भसम्भव ।
पुरा श्रीललितादेवी भक्तानां हितकाम्यया ॥
वाग्देवीवशिनीमुख्याः समाहूयेदमब्रवीत् । ५५
वाग्देवता वशिन्याद्याः शृणुध्वं वचनं मम ॥
भवन्त्यो मत्प्रसादेन प्रोल्लसद्वाग्विभूतयः ।
मद्भक्तानां वाग्विभूतिप्रदाने विनियोजिताः ॥
मच्चक्रस्य रहस्यज्ञा मम नामपरायणाः ।
मम स्तोत्रविधानाय तस्मादाज्ञापयामि वः ॥ ६०
कुरुध्वमङ्कितं स्तोत्रं मम नामसहस्रकैः ।
येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत् ॥
इत्याज्ञप्तास्ततो देव्यः श्रीदेव्या ललिताम्बया ।
रहस्यैर्नामभिर्दिव्यैश्चक्रुः स्तोत्रमनुत्तमम् ॥
रहस्यनामसाहस्रमिति तद्विश्रुतं परम् । ६५
ततः कदाचित्सदसि स्थित्वा सिंहासनेऽम्बिका ॥
स्वसेवावसरं प्रादात्सर्वेषां कुम्भसम्भव ।
सेवार्थमागतास्तत्र ब्रह्माणीब्रह्मकोटयः ॥

லக்ஷ்மீ நாராயணாநாம் ச கோடயஸ் ஸமுபாகதா꞉ |
கௌரீகோடி ஸமேதாநாம் ருத்ராணாமபி கோடய꞉ ||
மந்த்ரிணீ தண்டிநீமுக்யா꞉ ஸேவார்த்தம் யாஸ் ஸமாகதா꞉ |
ஶக்தயோ விவிதாகாரா꞉ தாஸாம் ஸங்க்யா ந வித்யதே ||
திவ்யௌகா மானவௌகாஶ்ச ஸித்தௌகாஶ்ச ஸமாகதா꞉ |
தத்ர ஶ்ரீலலிதாதேவீ ஸர்வேஷாம் தர்ஶநம் ததௌ ||
தேஷு த்ருஷ்டோபவிஷ்டேஷு ஸ்வே ஸ்வே ஸ்தானே யதாக்ரமம் |
தத்ர ஶ்ரீலலிதாதேவீ கடாக்ஷாக்ஷேபசோதிதா꞉ ||
உத்தாய வஶிநீமுக்யா பத்தாஞ்ஜலி புடாஸ் ததா |
அஸ்துவந் நாமஸாஹஸ்ரை꞉ ஸ்வக்ருதைர் லலிதாம்பிகாம் ||
ஶ்ருத்வா ஸ்தவம் ப்ரஸன்னாபூத் லலிதா பரமேஶ்வரீ |
தே ஸர்வே விஸ்மயம் ஜக்மு꞉ யே தத்ர ஸதஸி ஸ்திதா꞉ ||
தத꞉ ப்ரோவாச லலிதா ஸதஸ்யாந் தேவதாகணான் |
மமாஜ்ஞயைவ வாக்தேவ்ய꞉ சக்ருஸ் ஸ்தோத்ரமனுத்தமம் ||
அங்கிதம் நாமபிர் திவ்யை꞉ மம ப்ரீதி விதாயகை꞉ |
தத் படத்வம் ஸதா யூயம் ஸ்தோத்ரம் மத்ப்ரீதி வ்ருத்தயே ||
ப்ரவர்தயத்வம் பக்தேஷு மம நாமஸஹஸ்ரகம் |
இதம் நாமஸஹஸ்ரம் மே யோ பக்த꞉ படதே ஸக்ருத் ||
ஸமே ப்ரியதமோ ஜ்ஞேய꞉ தஸ்மை காமான் ததாம்யஹம் |
ஶ்ரீசக்ரே மாம் ஸமப்யர்ச்ய ஜப்த்வா பஞ்சதஶாக்ஷரீம் ||
பஶ்சாந் நாமஸஹஸ்ரம் மே கீர்த்தயேந் மம துஷ்டயே |
மாமர்ச்சயது வா மா வா வித்யாம் ஜபது வா ந வா |
கீர்தயேந் நாமஸாஹஸ்ரம் இதம் மத்ப்ரீதயே ஸதா |
மத் ப்ரீத்யா ஸகலான் காமான் லபதே நாத்ர ஸம்ஶய꞉ |
தஸ்மாந் நாமஸஹஸ்ரம் மே கீர்த்தயத்வம் ஸதாதராத் |
இதி ஶ்ரீலலிதேஶானீ ஶாஸ்தி தேவான் ஸஹாநுகான் |

लक्ष्मीनारायणानां च कोटयः समुपागताः ।
गौरीकोटिसमेतानां रुद्राणामपि कोटयः ॥ ७०
मन्त्रिणीदण्डिनीमुख्याः सेवार्थं यास्समागताः ।
शक्तयो विविधाकारास्तासां संख्या न विद्यते॥
दिव्यौघा मानवौघाश्च सिद्धौघाश्च समागताः ।
तत्र श्रीललितादेवी सर्वेषां दर्शनं ददौ ॥
तेषु दृष्टोपविष्टेषु स्वे स्वे स्थाने यथाक्रमम् । ७५
ततः श्रीललितादेवीकटाक्षाक्षेपचोदिताः ॥
उत्थाय वशिनीमुख्या बद्धाञ्जलिपुटास्तदा ।
अस्तुवन्नामसाहस्रैः स्वकृतैर्ललिताम्बिकाम् ॥
श्रुत्वा स्तवं प्रसन्नाभूल्ललिता परमेश्वरी ।
ते सर्वे विस्मयं जग्मुर्ये तत्र सदसि स्थिताः ॥ ८०
ततः प्रोवाच ललिता सदस्यान्देवतागणान् ।
ममाज्ञयैव वाग्देव्यश्चक्रुः स्तोत्रमनुत्तमम् ॥
अङ्कितं नामभिर्दिव्यैर्मम प्रीतिविधायकैः ।
तत्पठध्वं सदा यूयं स्तोत्रं मत्प्रीतिवृद्धये ॥
प्रवर्तयध्वं भक्तेषु मम नामसहस्रकम् । ८५
इदं नामसहस्रं मे यो भक्तः पठते सकृत् ॥
स मे प्रियतमो ज्ञेयस्तस्मै कामान् ददाम्यहम् ।
श्रीचक्रे मां समभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ॥
पश्चान्नामसहस्रं मे कीर्तयेन्मम तुष्टये ।
मामर्चयतु वा मा वा विद्यां जपतु वा न वा ॥ ९०
कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदा ।
मत्प्रीत्या सकलान्कामांल्लभते नात्र संशयः ॥
तस्मान्नामसहस्रं मे कीर्तयध्वं सदादरात् ।
इति श्रीललितेशानी शास्ति देवान्सहानुगान् ॥

ததாஜ்ஞயா ததாரப்ய ப்ரஹ்ம விஷ்ணு மஹேஶ்வரா: |
ஶக்தயோ மந்த்ரிணீ முக்யா: இதம் நாமஸஹஸ்ரகம் ||
படந்தி பக்த்யா ஸததம் லலிதா பரிதுஷ்டயே |
தஸ்மாதவஶ்யும் பக்தேந கீர்த்தனீயுமிதம் முனே ||
ஆவஶ்யகத்வே ஹேதுஸ்தே மயா ப்ரோக்தோ முனீஶ்வர
இதாநீம் நாமஸாஹஸ்ரம் வக்ஷ்யாமி ஶ்ரத்தயா ஶ்ருணு ||

இதி ஸ்ரீ ப்ரம்ஹாண்டபுராணே ஹயக்ரீவாகஸ்த்ய ஸம்வாதே
ஸ்ரீலலிதா ஸஹஸ்ரநாம பூர்வபாகோநாம
ப்ரதமோத்யாய:

ந்யாஸ:

அஸ்ய ஸ்ரீலலிதாஸஹஸ்ரநாம ஸ்தோத்ர மஹா மந்த்ரஸ்ய வஶிந்யாதி வாக்தேவதா ரிஷய: அநுஷ்டுப்சந்த: ஸ்ரீலலிதாபரமேச்வரீ தேவதா|| ஸ்ரீமத்வாக்பவ கூடேதி பீஜம், மத்ய கூடேதி ஶக்தி: ஶக்திகூடேதி கீலகம் | மூலப்ரக்ருதி ரிதி த்யானம் || ஸ்ரீலலிதாமஹாதரிபுர ஸுந்தரீப்ரஸாத ஸித்தி த்வாரா சிந்தித பலாவாப்த்யர்ததே ஜபே விநியோக: ||

மூலமந்த்ரேண அங்கந்யாஸம் கரந்யாஸம் குர்யாத் ||

த்யானம்

ஸிந்தூராருணவிக்ரஹாம் த்ரிணயனும் மாணிக்யமௌலிஸ்புரத்தாராநாயகசேகராம் ஸ்மிதமுகீமாபீன வக்ஷோருஹாம் | பாணிப்யாம் அலிபூர்ணரதனசஷகம் ரக்தோத்பலம் பிப்ரதீம் ஸௌம்யாம் ரத்னகடஸ்த ரக்தசரணும் த்யாயேத்பராம் அம்பிகாம் || அருணும் கருணாதரங்கிதாக்ஷீம த்ருதபாஶாங்குஶபுஷ்ப பாணசாபாம | அணிமாதிபி ராவ்ருதாம மயூகை: அஹமித்யேவ விபாவயே பவானீம் || த்யாயேத் பதமாஸநஸ்த்தாம விகஸித வதநாம் பத்மபத்ராயதாக்ஷீம் ஹேமாபாம்பீதவஸ்த்ராம் கரகலித லஸத் ஹேமபத்மாம் வராங்கீம் | ஸர்வாலங்காரயுக்தாம் ஸததமபயதாம் பக்தநம்ராம் பவானீம ஸ்ரீவித்யாம் ஶாந்த மூர்த்திம் ஸகலஸுரநுதாம் ஸர்வஸம்பத்ப்ரதாதரீம் || ஸகுங்குமவிலேபநாமளிகசும்பி கஸ்தூரிகாம ஸமந்தஹஸிதேக்ஷணும் ஸஶரசாப பாஶாங்குஶாம | அஶேஷஜனமோஹிநீம் அருணமால்யபூஷாம்பராம் ஜபாகுஸுமபாஸுராம் ஜபவிதௌ ஸ்மரேதம்பிகாம் ||

லமித்யாதி பஞ்சபூஜாம் குர்யாத்

तदाज्ञया तदारभ्य ब्रह्मविष्णुमहेश्वराः । ९५
शक्तयो मन्त्रिणीमुख्या इदं नामसहस्रकम् ॥
पठन्ति भक्त्या सततं ललितापरितुष्टये ।
तस्मादवश्यं भक्तेन कीर्तनीयमिदं मुने ॥
आवश्यकत्वे हेतुत्वे मया प्रोक्तो मुनीश्वर ।
इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया शृणु ॥ १००

इति श्रीब्रह्माण्डपुराणे श्रीहयग्रीवागस्त्यसंवादे
श्रीललितास्तोत्रसहस्रनामपूर्वभागो नाम
प्रथमोऽध्यायः ॥

॥ न्यासः ॥

अस्य श्रीललितासहस्रनामस्तोत्रमहामन्त्रस्य । वशिन्यादि-वाग्देवता ऋषयः । अनुष्टुप् छन्दः । श्रीललितापरमेश्वरी देवता । श्रीमद्वाग्भवकूटेति बीजम् मध्यकूटेति शक्तिः । शक्तिकूटेति कीलकम् । मूलप्रकृतिरिति ध्यानम् । श्रीललितामहात्रिपुरसुन्दरीप्रसादसिद्धि-द्वारा चिन्तितफलावाप्त्यर्थे जपे विनियोगः ॥

॥ मूलमन्त्रेण अङ्गन्यासं करन्यासं कुर्यात् ॥

ध्यानम्

सिन्दूरारुणविग्रहां त्रिणयनां माणिक्यमौलिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् । पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामम्बिकाम् ॥ अरुणां करुणातरङ्गिताक्षीं धृतपाशांकुशपुष्पबाणचापाम् । अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥ ध्यायेत्पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वराङ्गीम् । सर्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं श्रीविद्यां शान्तमूर्तिं सकलसुरनुतां सर्वसम्पत्प्रदात्रीम् ॥ सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां समन्दहसितेक्षणां सशरचापपाशांकुशाम् । अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां जपाकुसुमभासुरां जपविधौ स्मरेदम्बिकाम् ॥

लमित्यादिपञ्चपूजां कुर्यात् ॥

ஸ்ரீ:

|| ஸ்ரீ லலிதா ஸஹஸ்ர நாம ஸ்தோத்ரம் ||

ஸ்ரீமாதா ஸ்ரீமஹாராஜ்ஞீ ஸ்ரீமத் ஸிம்ஹாஸனேஶ்வரீ |
சிதக்னிகுண்ட ஸம்பூதா தேவகார்யஸமுத்யதா ||
உத்யத்பானு ஸஹஸ்ராபா சதுர்பாஹு ஸமன்விதா |
ராகஸ்வரூப பாஶாட்யா க்ரோதாகாராங்குஶோஜ்வலா ||
மனோரூபேக்ஷு கோதண்டா பஞ்சதன்மாத்ர ஸாயகா |
நிஜாருண ப்ரபாபூர மஜ்ஜத் ப்ரஹ்மாண்ட மண்டலா ||
சம்பகாஶோக புன்னாக ஸௌகந்திக லஸத்கசா |
குருவிந்தமணி ஶ்ரேணீ கனத்கோடீர மண்டிதா ||
அஷ்டமீ சந்த்ரவிப்ராஜ தளிகஸ்த்தல ஶோபிதா |
முகசந்த்ர களங்காப ம்ருகநாபிவிஶேஷகா ||
வதனஸ்மரமாங்கல்ய க்ருஹ தோரண சில்லிகா |
வக்த்ரலக்ஷ்மீ பரீவாஹ சலன் மீனாபலோசனா ||
நவ சம்பக புஷ்பாப நாஸா தண்ட விராஜிதா |
தாராகாந்தி திரஸ்காரீ நாஸாபரண பாஸுரா ||
கதம்பமஞ்ஜரீ க்லுப்த கர்ணபூர மனோஹரா |
தாடங்கயுகளீபூத தபனோடுப மண்டலா ||
பத்மராக ஶிலாதர்ஶ பரிபாவி கபோலபூ: |
நவ வித்ரும பிம்பஸ்ரீ ந்யக்காரி தஶனச்சதா ||
ஶுத்த வித்யாங்குராகார த்விஜபங்க்தி த்வயோஜ்வலா |
கர்ப்பூர வீடிகாமோத ஸமாகர்ஷத் திகந்தரா ||
நிஜஸல்லாப மாதுர்ய விநிர்பர்த்ஸித கச்சபீ |
மந்த ஸ்மித ப்ரபாபூர மஜ்ஜத்காமேஶ மானஸா ||

श्रीः

॥ श्री ललितासहस्रनामस्तोत्रम् ॥

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता ॥
उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता ।
रागस्वरूपपाशाढ्या क्रोधाकारांकुशोज्वला ॥
मनोरूपेक्षुकोदण्डा पञ्चतन्मात्रसायका । ५
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला ॥
चम्पकाशोकपुन्नागसौगन्धिकलसत्कचा ।
कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डिता ॥
अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता ।
मुखचन्द्रकलङ्काभमृगनाभिविशेषका ॥ १०
वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका ।
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना ॥
नवचम्पकपुष्पाभनासादण्डविराजिता ।
ताराकान्तितिरस्कारिनासाभरणभासुरा ॥
कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरा । १५
ताटङ्कयुगलीभूततपनोडुपमण्डला ॥
पद्मरागशिलादर्शपरिभाविकपोलभूः ।
नवविद्रुमबिम्बश्रीन्यक्कारिदशनच्छदा ॥
शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला ।
कर्पूरवीटिकामोदसमाकर्षद्दिगन्तरा ॥ २०
निजसल्लापमाधुर्यविनिर्भर्त्सितकच्छपी ।
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा ॥

அநாகலித ஸாத்ருஶ்ய சுபுகஶ்ரீ விராஜிதா |
காமேஶ பத்த மாங்கல்ய ஸூத்ரஶோபித கந்தரா ||
கனகாங்கத கேயூர கமனீய புஜான்விதா | 25
ரத்ன க்ரைவேய சிந்தாக லோல முக்தா பலான்விதா ||
காமேஶ்வர ப்ரேமரத்ன மணி ப்ரதிபணஸ்தனீ |
நாப்யாலவால ரோமாளி லதாபல குசத்வயீ
லக்ஷ்யரோம லதாதாரதா ஸமுன்னேய மத்யமா |
ஸ்தனபார தலன்மத்ய பட்டபந்த வலித்ரயா || 30
அருணாருண கௌஸும்ப வஸ்த்ர பாஸ்வத்கடீதடீ |
ரத்ன கிங்கிணிகா ரம்ய ரஶநாதாம பூஷிதா ||
காமேஶஜ்ஞாத ஸௌபாக்ய மார்தவோரு த்வயான்விதா |
மாணிக்ய மகுடாகார ஜானுத்வய விராஜிதா ||
இந்த்ரகோப பரிக்ஷிப்த ஸ்மரதூணாப ஜங்கிகா | 35
கூடகுல்பா கூர்மப்ருஷ்ட ஜயிஷ்ணு ப்ரபதான்விதா ||
நகதீதிதி ஸஞ்சன்ன நமஜ்ஜன தமோகுணா |
பதத்வய ப்ரபாஜால பராக்ருத ஸரோருஹா ||
ஶிஞ்ஜான மணிமஞ்ஜீர மண்டித ஶ்ரீ பதாம்புஜா |
மராலீ மந்தகமனா மஹா லாவண்ய ஶேவதி* || 40
ஸர்வாருணா அநவத்யாங்கீ ஸர்வாபரண பூஷிதா |
ஶிவ காமேஶ்வராங்கஸ்தா ஶிவா ஸ்வாதீனவல்லபா
ஸுமேருமத்ய ஶ்ருங்கஸ்தா ஶ்ரீமந் நகர நாயிகா |
சிந்தாமணி க்ருஹாந்தஸ்தா பஞ்சப்ரஹ்மாஸனஸ்திதா
மஹா பத்மாடவீ ஸம்ஸ்தா கதம்பவன வாஸினீ | 45
ஸுதாஸாகர மத்யஸ்தா காமாக்ஷீ காமதாயினீ ||
தேவர்ஷிகண ஸங்காத ஸ்தூயமானாத்ம வைபவா |
பண்டாஸுர வதோத்யுக்த ஶக்திஸேனா ஸமன்விதா

अनाकलितसादृश्यचुबुकश्रीविराजिता ।
कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरा ॥
कनकाङ्गदकेयूरकमनीयभुजान्विता ।
रत्नग्रैवेयचिन्ताकल्लोलमुक्ताफलान्विता ॥
कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी ।
नाभ्यालवालरोमालिलताफलकुचद्वयी ॥
लक्ष्यरोमलताधारतासमुन्नेयमध्यमा ।
स्तनभारदलन्मध्यपट्टबन्धवलित्रया ॥
अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी ।
रत्नकिङ्किणिकारम्यरशनादामभूषिता ॥
कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता ।
माणिक्यमुकुटाकारजानुद्वयविराजिता ॥
इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिका ।
गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता ॥
नखदीधितिसंछन्ननमज्जनतमोगुणा ।
पदद्वयप्रभाजालपराकृतसरोरुहा ॥
शिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा ।
मरालीमन्दगमना महालावण्यशेवधिः ॥
सर्वारुणाऽनवद्याङ्गी सर्वाभरणभूषिता ।
शिवकागेश्वराङ्कस्था शिवा स्वाधीनवल्लभा ॥
सुमेरुमध्यशृङ्गस्था श्रीमन्नगरनायिका ।
चिन्तामणिगृहान्तस्था पञ्चब्रह्मासनस्थिता ॥
महापद्माटवीसंस्था कदम्बवनवासिनी ।
सुधासागरमध्यस्था कामाक्षी कामदायिनी ॥
देवर्षिगणसङ्घातस्तूयमानात्मवैभवा ।
भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता ॥

ஸம்பத்கரீ ஸமாரூட ஸிந்துர வ்ரஜஸேவிதா |
அஶ்வாரூடா திஷ்டிதாஶ்வ கோடிகோடிபிராவ்ருதா
சக்ர ராஜ ரதாரூட ஸர்வாயுத பரிஷ்க்ருதா |
கேயசக்ர ரதாரூட மந்த்ரிணீ பரிஸேவிதா
கிரிசக்ர ரதாரூட தண்டநாதா புரஸ்க்ருதா |
ஜ்வாலா மாலினிகா க்ஷிப்த வஹ்னி ப்ராகார மத்யகா||
பண்ட ஸைன்ய வதோத்யுக்த ஶக்தி விக்ரமஹர்ஷிதா |
நித்யா பராக்ரமாடோப நிரீக்ஷண ஸமுத்ஸுகா||
பண்டபுத்ர வதோத்யுக்த பாலா விக்ரமநந்திதா |
மந்த்ரிண்யம்பா விரசித விஷங்கவத தோஷிதா||
விஶுக்ர ப்ராணஹரண வாராஹீ வீர்யநந்திதா |
காமேஶ்வர முகாலோக கல்பித ஸ்ரீகணேஶ்வரா||
மஹாகணேஶ நிர்பின்ன விக்னயந்த்ர ப்ரஹர்ஷிதா |
பண்டாஸுரேந்த்ர நிர்முக்த ஶஸ்த்ர ப்ரத்யஸ்த்ர வர்ஷிணீ||
கராங்குலி நகோத்பன்ன நாராயண தஶாக்ருதி꞉ |
மஹாபாஶுபதாஸ்த்ராக்னி நிர்தக்தாஸுர ஸைனிகா||
காமேஶ்வராஸ்த்ர நிர்தக்த ஸபண்டாஸுரஶூன்யகா |
ப்ரஹ்மோபேந்த்ர மஹேந்த்ராதி தேவஸம்ஸ்துத வைபவா||
ஹரநேத்ராக்னி ஸந்தக்த காமஸஞ்ஜீவனௌஷதி꞉ |
ஸ்ரீமத்வாக்பவகூடைக ஸ்வரூப முகபங்கஜா||
கண்டாத꞉ கடிபர்யந்த மத்யகூடஸ்வரூபிணீ |
ஶக்தி கூடைகதாபன்ன கட்யதோபாக தாரிணீ||
மூலமந்த்ராத்மிகா மூலகூடத்ரய கலேபரா |
குலாம்ருதைக ரஸிகா குலஸங்கேத பாலினீ||
குலாங்கனா குலாந்தஸ்த்தா கௌலினீ குலயோகினீ |
அகுலா ஸமயாந்தஸ்த்தா ஸமயாசார தத்பரா||

सम्पत्करी समारूढसिन्धुरव्रजसेविता ।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता ॥
चक्रराजरथारूढसर्वायुधपरिष्कृता ।
गेयचक्ररथारूढमन्त्रिणीपरिसेविता ॥
किरिचक्ररथारूढदण्डनाथापुरस्कृता ।
ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा ॥
भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता ।
नित्या पराक्रमाटोपनिरीक्षणसमुत्सुका ॥
भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दिता ।
मन्त्रिण्यम्बाविरचितविषङ्गवधतोषिता ॥
विशुक्रप्राणहरण वाराही वीर्यनन्दिता ।
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा ॥
महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता ।
भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी ॥
कराङ्गुलिनखोत्पन्ननारायणदशाकृतिः ।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका ॥
कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यका ।
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा ॥
हरनेत्राग्निसन्दग्धकामसंजीवनौषधिः ।
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा ॥
कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिणी ।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी ॥
मूलमन्त्रात्मिका मूलकूटत्रयकलेबरा ।
कुलामृतैकरसिका कुलसंकेतपालिनी ॥
कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
अकुला समयान्तस्था समयाचारतत्परा ॥

மூலாதாரைக நிலயா ப்ரஹ்ம க்ரந்தி விபேதினீ|
மணிபூராந்தருதிதா விஷ்ணுக்ரந்தி விபேதினீ||
ஆஜ்ஞாசக்ராந்தராலஸ்த்தா ருத்ரக்ரந்தி விபேதினீ|
ஸஹஸ்ராராம்புஜாரூடா ஸுதாஸாராபி வர்ஷிணீ||
தடில்லதாஸமருசி: ஷட்சக்ரோபரி ஸம்ஸ்த்திதா |
மஹாஸக்தி: குண்டலினீ பிஸதந்து தனீயஸீ||
பவானீ பாவனாகம்யா பவாரண்ய குடாரிகா |
பத்ரப்ரியா பத்ரமூர்த்தி: பக்த ஸௌபாக்ய தாயினீ
பக்திப்ரியா பக்திகம்யா பக்திவஶ்யா பயாபஹா|
ஶாம்பவீ ஶாரதா ராத்யா ஶர்வாணீ ஶர்மதாயினீ||
ஶாங்கரீ ஶ்ரீகரீ ஸாத்வீ ஶரச்சந்த்ர நிபானனா|
ஶாதோதரீ ஶாந்திமதீ நிராதாரா நிரஞ்ஜனா||
நிர்லேபா நிர்மலா நித்யா நிராகாரா நிராகுலா|
நிர்குணா நிஷ்கலா ஶாந்தா நிஷ்காமா நிருபப்லவா||
நித்யமுக்தா நிர்விகாரா நிஷ்ப்ரபஞ்சா நிராஶ்ரயா|
நித்யஶுத்தா நித்யபுத்தா நிரவத்யா நிரந்தரா||
நிஷ்காரணா நிஷ்களங்கா நிருபாதிர் நிரீஶ்வரா |
நீராகா ராகமதனீ நிர்மதா மதநாஶினீ||
நிஶ்சிந்தா நிரஹங்காரா நிர்மோஹா மோஹநாஶினீ |
நிர்மமா மமதாஹந்த்ரீ நிஷ்பாபா பாபநாஶினீ||
நிஷ்க்ரோதா க்ரோதஶமனீ நிர்லோபா லோபநாஶினீ |
நிஸ்ஸம்ஶயா ஸம்ஶயக்னீ நிர்பவா பவநாஶினீ||
நிர்விகல்பா நிராபாதா நிர்பேதா பேதநாஶினீ |
நிர்நாஶா ம்ருத்யுமதனீ நிஷ்க்ரியா நிஷ்பரிக்ரஹா||
நிஸ்துலா நீலசிகுரா நிரபாயா நிரத்யயா |
துர்லபா துர்கமா துர்கா துக்கஹந்த்ரீ ஸுகப்ரதா||

मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी । ७५
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी ॥
आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी ।
सहस्राराम्बुजारूढा सुधासाराभिवर्षिणी ॥
तटिल्लतासमरुचिः षट्चक्रोपरि संस्थिता ।
महासक्तिः कुण्डलिनी बिसतन्तुतनीयसी ॥ ८०
भवानी भावनागम्या भवारण्यकुठारिका ।
भद्रप्रिया भद्रमूर्तिर्भक्तसौभाग्यदायिनी ॥
भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शांभवी शारदाराध्या शर्वाणी शर्मदायिनी ॥
शांकरी श्रीकरी साध्वी शरच्चन्द्रनिभानना । ८५
शातोदरी शान्तिमती निराधारा निरञ्जना ॥
निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥
नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥ ९०
निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥
निश्चिन्ता निरहंकारा निर्मोहा मोहनाशिनी ।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ॥
निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी । ९५
निःसंशया संशयघ्नी निर्भवा भवनाशिनी ॥
निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥
निस्तुला नीलचिकुरा निरपाया निरत्यया ।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥ १००

துஷ்டதூரா துராசார ஶமனீ தோஷ வர்ஜிதா |
ஸர்வஜ்ஞா ஸாந்த்ரகருணா ஸமாநாதிக வர்ஜிதா||
ஸர்வஶக்திமயீ ஸர்வ மங்களா ஸத்கதிப்ரதா |
ஸர்வேஶ்வரீ ஸர்வமயீ ஸர்வமந்த்ர ஸ்வரூபிணீ||
ஸர்வயந்த்ராத்மிகா ஸர்வ தந்த்ரரூபா மனோன்மனீ | 105
மாஹேஶ்வரீ மஹாதேவீ மஹாலக்ஷ்மீர் ம்ருடப்ரியா||
மஹாரூபா மஹாபூஜ்யா மஹாபாதக நாஶினீ |
மஹாமாயா மஹாஸத்வா மஹாஶக்திர் மஹாரதி:||
மஹா போகா மஹைஶ்வர்யா மஹாவீர்யா மஹாபலா |
மஹாபுத்திர் மஹாஸித்தி: மஹாயோகீஶ்வரேஶ்வரீ || 110
மஹாதந்த்ரா மஹாமந்த்ரா மஹாயந்த்ரா மஹாஸநா |
மஹாயாகக்ரமாராத்யா மஹாபைரவ பூஜிதா ||
மஹேஶ்வர மஹாகல்ப மஹாதாண்டவ ஸாக்ஷிணீ |
மஹாகாமேஶ மஹிஷீ மஹாத்ரிபுர ஸுந்தரீ ||
சதுஷ்ஷஷ்ட்யுபசாராட்யா சதுஷ்ஷஷ்டி கலாமயீ | 115
மஹாசதுஷ்ஷஷ்டிகோடி யோகினீ கணஸேவிதா ||
மனுவித்யா சந்த்ரவித்யா சந்த்ரமண்டல மத்யகா |
சாருரூபா சாருஹாஸா சாருசந்த்ர கலாதரா ||
சராசர ஜகன்னாதா சக்ரராஜ நிகேதனா |
பார்வதீ பத்மநயனா பத்மராக ஸமப்ரபா || 120
பஞ்சப்ரேதாஸநாஸீனா பஞ்சப்ரஹ்ம ஸ்வரூபிணீ |
சின்மயீபரமானந்தா விஜ்ஞான கனரூபிணீ ||
த்யான த்யாத்ரு த்யேயரூபா தர்மாதர்ம விவர்ஜிதா |
விஶ்வரூபா ஜாகரிணீ ஸ்வபந்தீ தைஜஸாத்மிகா||
ஸுப்தா ப்ராஜ்ஞாத்மிகா துர்யா ஸர்வாவஸ்தா விவர்ஜிதா | 125
ஸ்ருஷ்டிகர்த்ரீ ப்ரஹ்மரூபா கோப்த்ரீ கோவிந்தரூபிணீ ||

दुष्टदूरा दुराचारशमनी दोषवर्जिता ।
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता ॥
सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा ।
सर्वेश्वरी सर्वमयी सर्वमन्त्रस्वरूपिणी ॥
सर्वयन्त्रात्मिका सर्वमन्त्ररूपा मनोन्मनी । १०५
माहेश्वरी महादेवी महालक्ष्मीर्मृडप्रिया ॥
महारूपा महापूज्या महापातकनाशिनी ।
महामाया महासत्वा महाशक्तिर्महारतिः ॥
महाभोगा महैश्वर्या महावीर्या महाबला ।
महाबुद्धिर्महासिद्धिर्महायोगीश्वरेश्वरी ॥ ११०
महातन्त्रा महामन्त्रा महायन्त्रा महासना ।
महायागक्रमाराध्या महाभैरवपूजिता ॥
महेश्वरमहाकल्पमहाताण्डवसाक्षिणी ।
महाकामेशमहिषी महात्रिपुरसुन्दरी ॥
चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी । ११५
महाचतुःषष्टिकोटियोगिनीगणसेविता ॥
मनुविद्या चन्द्रविद्या चन्द्रमण्डलमध्यगा ।
चारुरूपा चारुहासा चारुचन्द्रकलाधरा ॥
चराचरजगन्नाथा चक्रराजनिकेतना ।
पार्वती पद्मनयना पद्मरागसमप्रभा ॥ १२०
पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी ।
चिन्मयी परमानन्दा विज्ञानघनरूपिणी ॥
ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता ।
विश्वरूपा जागारिणी स्वपन्ती तैजसात्मिका ॥
सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता । १२५
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ॥

ஸம்ஹாரிணீ ருத்ரரூபா திரோதானகரீஶ்வரீ |
ஸதாஶிவானுக்ரஹதா பஞ்சக்ருத்ய பராயணா ||
பானுமண்டல மத்யஸ்தா பைரவீ பகமாலினீ |
பத்மாஸனா பகவதீ பத்மநாப ஸஹோதரீ || 130
உன்மேஷ நிமிஷோத்பன்ன விபன்ன புவனாவளீ |
ஸஹஸ்ரஶீர்ஷ வதனா ஸஹஸ்ராக்ஷீ ஸஹஸ்ரபாத் ||
ஆப்ரஹ்ம கீடஜனனீ வர்ணாஶ்ரம விதாயினீ |
நிஜாஜ்ஞாரூப நிகமா புண்யாபுண்ய பலப்ரதா ||
ஶ்ருதி ஸீமந்தஸிந்தூரீ க்ருத பாதாப்ஜ தூளிகா | 135
ஸகலாகம ஸந்தோஹ ஶுக்தி ஸம்புட மௌக்திகா ||
புருஷார்த்தப்ரதா பூர்ணா போகினீ புவனேச்வரீ |
அம்பிகா அனாதிநிதனா ஹரி ப்ரஹ்மேந்த்ர ஸேவிதா ||
நாராயணீ நாதரூபா நாமரூபவிவர்ஜிதா |
ஹ்ரீங்காரீ ஹ்ரீமதீ ஹ்ருத்யா ஹேயோபாதேயவர்ஜிதா 140
ராஜராஜார்ச்சிதா ராஜ்ஞீ ரம்யா ராஜீவலோசனா |
ரஞ்சனீ ரமணீ ரஸ்யா ரணத்கிங்கிணி மேகலா ||
ரமா ராகேந்துவதனா ரதிரூபா ரதிப்ரியா |
ரக்ஷாகரீ ராக்ஷஸக்னீ ராமா ரமணலம்படா ||
காம்யா காமகலாரூபா கதம்ப குஸுமப்ரியா | 145
கல்யாணீ ஜகதீகந்தா கருணாரஸ ஸாகரா ||
கலாவதீ கலாலாபா காந்தா காதம்பரீ ப்ரியா |
வரதா வாமநயனா வாருணீ மதவிஹ்வலா ||
விஶ்வாதிகா வேதவேத்யா விந்த்யாசல நிவாஸினீ |
விதாத்ரீ வேதஜனனீ விஷ்ணுமாயா விலாஸினீ || 150
க்ஷேத்ரஸ்வரூபா க்ஷேத்ரேஶீ க்ஷேத்ரக்ஷேத்ரஜ்ஞ பாலினீ |
க்ஷயவ்ருத்தி வினிர்முக்தா க்ஷேத்ரபால ஸமர்ச்சிதா ||

सहारिणी रुद्ररूपा तिरोधानकरीश्वरी ।
सदाशिवानुग्रहदा पञ्चकृत्यपरायणा ॥
भानुमण्डलमध्यस्था भैरवी भगमालिनी ।
पद्मासना भगवती पद्मनाभसहोदरी ॥ १३०
उन्मेषनिमिषोत्पन्नविपन्नभुवनावली ।
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ॥
आब्रह्मकीटजननी वर्णाश्रमविधायिनी ।
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा ॥
श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका । १३५
सकलागमसन्दोहशुक्तिसम्पुटमौक्तिका ॥
पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी ।
अम्बिकानादिनिधना हरिब्रह्मेन्द्रसेविता ॥
नारायणी नादरूपा नामरूपविवर्जिता ।
ह्रींकारी ह्रीमती हृद्या हेयोपादेयवर्जिता ॥ १४०
राजराजार्चिता राज्ञी रम्या राजीवलोचना ।
रञ्जनी रमणी रस्या रणत्किङ्किणिमेखला ॥
रमा राकेन्दुवदना रतिरूपा रतिप्रिया ।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ॥
काम्या कामकलारूपा कदम्बकुसुमप्रिया । १४५
कल्याणी जगतीकन्दा करुणारससागरा ॥
कलावती कलालापा कान्ता कादम्बरीप्रिया ।
वरदा वामनयना वारुणीमदविह्वला ॥
विश्वाधिका वेदवेद्या विन्ध्याचलनिवासिनी ।
विधात्री वेदजननी विष्णुमायाविलासिनी ॥ १५०
क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी ।
क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता ।

விஜயா விமலா வந்த்யா வந்தாருஜன வத்ஸலா |
வாக்வாதினீ வாமகேஶீ வஹ்னி மண்டல வாஸினீ ||
பக்திமத் கல்பதிகா பஶுபாஶ விமோசனீ |
ஸம்ஹ்ருதாஶேஷ பாஷண்டா ஸதாசார ப்ரவர்த்திகா ||
தாபத்ரயாக்னி ஸந்தப்த ஸமாஹ்லாதன சந்த்ரிகா |
தருணீ தாபஸாராத்யா தனுமத்யா தமோபஹா ||
சிதிஸ் தத்பத லக்ஷ்யார்த்தா சிதேகரஸ ரூபிணீ |
ஸ்வாத்மானந்த லவீபூத ப்ரஹ்மாத்யானந்த ஸந்ததி:
பரா ப்ரத்யக் சிதீரூபா பஶ்யந்தீ பரதேவதா |
மத்யமா வைகரீரூபா பக்தமானஸ ஹம்ஸிகா ||
காமேஶ்வர ப்ராணநாடீ க்ருதஜ்ஞா காமபூஜிதா |
ஶ்ருங்கார ரஸ ஸம்பூர்ணா ஜயா ஜாலந்தரஸ்த்திதா ||
ஓட்யாண பீடநிலயா பிந்துமண்டல வாஸினீ |
ரஹோயாக க்ரமாராத்யா ரஹஸ்தர்ப்பண தர்ப்பிதா ||
ஸத்ய: ப்ரஸாதினீ விஶ்வ ஸாக்ஷிணீ ஸாக்ஷிவர்ஜிதா |
ஷடங்க தேவதாயுக்தா ஷாட்குண்ய பரிபூரிதா ||
நித்யக்லின்னா நிருபமா நிர்வாண ஸுகதாயினீ |
நித்யா ஷோடஶிகா ரூபா ஶ்ரீகண்டார்த்த ஶரீரிணீ ||
ப்ரபாவதீ ப்ரபாரூபா ப்ரஸித்தா பரமேஶ்வரீ |
மூலப்ரக்ருதி ரவ்யக்தா வ்யக்தா வ்யக்த ஸ்வரூபிணீ ||
வ்யாபினீ விவிதாகாரா வித்யாவித்யா ஸ்வரூபிணீ |
மஹாகாமேஶ நயந குமுதாஹ்லாத கௌமுதீ ||
பக்தஹார்த்த தமோபேத பானுமத் பானுஸந்ததி: |
ஶிவதூதீ ஶிவாராத்யா ஶிவமூர்த்திஶ் ஶிவங்கரீ ||
ஶிவப்ரியா ஶிவபரா ஶிஷ்டேஷ்டா ஶிஷ்டபூஜிதா |
அப்ரமேயா ஸ்வப்ரகாஶா மனோவாசா மகோசரா ||

विजया विमला वन्द्या वन्दारुजनवत्सला ।
वाग्वादिनी वामकेशी वह्निमण्डलवासिनी ॥
भक्तिमत्कल्पलतिका पशुपाशविमोचिनी । १५५
संहृताशेषपाषण्डा सदाचारप्रवर्तिका ॥
तापत्रयाग्निसन्तप्तसमाह्लादनचन्द्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोऽपहा ॥
चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी ।
स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततिः ॥ १६०
परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता ।
मध्यमा वैखरीरूपा भक्तमानसहंसिका ॥
कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता ।
शृङ्गाररससम्पूर्णा जया जालन्धरस्थिता ॥
ओड्याणपीठनिलया बिन्दुमण्डलवासिनी । १६५
रहोयागक्रमाराध्या रहस्तर्पणतर्पिता ॥
सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता ।
षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूरिता ॥
नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी ।
नित्याषोडशिकारूपा श्रीकण्ठार्धशरीरिणी ॥ १७०
प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी ॥
व्यापिनी विविधाकारा विद्याविद्यास्वरूपिणी ।
महाकामेशनयनकुमुदाह्लादकौमुदी ॥
भक्तहार्दतमोभेदभानुमद्भानुसन्ततिः । १७५
शिवदूती शिवाराध्या शिवमूर्तिः शिवंकरी ॥
शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा ॥

சிச்சக்திஶ் சேதனாரூபா ஜடஶக்திர் ஜடாத்மிகா |
காயத்ரீ வ்யாஹ்ருதிஸ் ஸந்த்யா த்விஜப்ருந்த நிஷேவிதா || 180
தத்வாஸநா தத்வமயீ பஞ்சகோஶாந்தர ஸ்திதா |
நிஸ்ஸீம மஹிமா நித்ய யௌவனா மதஶாலினீ ||
மதகூர்ணித ரக்தாக்ஷீ மதபாடல கண்டபூ: |
சந்தன த்ரவ திக்தாங்கீ சாம்பேய குஸுமப்ரியா ||
குஶலா கோமளாகாரா குருகுல்லா குலேஶ்வரீ | 185
குலகுண்டாலயா கௌல மார்க தத்பர ஸேவிதா ||
குமாரகண நாதாம்பா துஷ்டி: புஷ்டிர் மதிர் த்ருதி: |
ஶாந்திஸ் ஸ்வஸ்திமதீ காந்தி: நந்தினீ விக்னநாஶினீ ||
தேஜோவதீ த்ரிநயனா லோலாக்ஷீ காமரூபிணீ |
மாலினீ ஹம்ஸினீ மாதா மலயாசல வாஸினீ || 190
ஸுமுகீ நளினீ ஸுப்ரூ: ஶோபனா ஸுரநாயிகா |
காலகண்டீ காந்திமதீ க்ஷோபிணீ ஸூக்ஷ்மரூபிணீ ||
வஜ்ரேஶ்வரீ வாமதேவீ வயோவஸ்தா விவர்ஜிதா |
ஸித்தேஶ்வரீ ஸித்தவித்யா ஸித்தமாதா யஶஸ்வினீ ||
விஶுத்தி சக்ரநிலயா ரக்தவர்ணா த்ரிலோசனா | 19
கட்வாங்காதி ப்ரஹரணா வதனைக ஸமன்விதா ||
பாயஸான்னப்ரியா த்வக்ஸ்தா பஶுலோக பயங்கரீ |
அம்ருதாதி மஹாஶக்தி ஸம்வ்ருதா டாகினீஶ்வரீ ||
அனாஹதாப்ஜ நிலயா ஶ்யாமாபா வதனத்வயா |
தம்ஷ்ட்ரோஜ்வலாக்ஷ மாலாதி தரா ருதிர ஸம்ஸ்திதா || 200
காளராத்ர்யாதி ஶக்த்யோக வ்ருதா ஸ்நிக்தௌதன ப்ரியா |
மஹாவீரேந்த்ர வரதா ராகிண்யம்பா ஸ்வரூபிணீ ||
மணிபூராப்ஜ நிலயா வதனத்ரய ஸம்யுதா |
வஜ்ராதிகாயுதோபேதா டாமர்யாதிபிராவ்ருதா ||

चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका ।
गायत्री व्याहृतिः सन्ध्या द्विजवृन्दनिषेविता ॥
तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता ।
निःसीममहिमा नित्ययौवना मदशालिनी ॥
मदघूर्णितरक्ताक्षी मदपाटलगण्डभूः ।
चन्दनद्रवदिग्धाङ्गी चाम्पेयकुसुमप्रिया ॥
कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुण्डालया कौलमार्गतत्परसेविता ॥
कुमारगणनाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः ।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्ननाशिनी ॥
तेजोवती त्रिणयना लोलाक्षी कामरूपिणी ।
मालिनी हंसिनी माता मलयाचलवासिनी ॥
सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका ।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ॥
वज्रेश्वरी वामदेवी वयोऽवस्थाविवर्जिता ।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥
विशुद्धिचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना ।
खट्वाङ्गादिप्रहरणा वदनैकसमन्विता ॥
पायसान्नप्रिया त्वक्स्था पशुलोकभयङ्करी ।
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी ॥
अनाहताब्जनिलया श्यामाभा वदनद्वया ।
दंष्ट्रोज्ज्वलाऽक्षमालादिधरा रुधिरसंस्थिता ॥
कालरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया ।
महावीरेन्द्रवरदा राकिण्यम्बास्वरूपिणी ।
मणिपूराब्जनिलया वदनत्रयसंयुता ।
वज्रादिकायुधोपेता डामर्यादिभिरावृता ॥

ரக்தவர்ணா மாம்ஸநிஷ்டா குடான்ன ப்ரீதமானஸா |
ஸமஸ்தபக்த ஸுகதா லாகின்யம்பா ஸ்வரூபிணீ ||
ஸ்வாதிஷ்டானாம்புஜகதா சதுர்வக்த்ர மனோஹரா |
ஶூலாத்யாயுத ஸம்பன்னா பீதவர்ணாதி கர்விதா ||
மேதோநிஷ்டா மதுப்ரீதா பந்தின்யாதி ஸமன்விதா |
தத்யன்னாஸக்த ஹ்ருதயா காகினீ ரூபதாரிணீ ||
மூலாதாராம் புஜாரூடா பஞ்சவக்த்ராஸ்தி ஸம்ஸ்திதா |
அங்குஶாதி ப்ரஹரணா வரதாதி நிஷேவிதா ||
முத்கௌதனாஸக்த சித்தா ஸாகின்யம்பா ஸ்வரூபிணீ |
ஆஜ்ஞா சக்ராப்ஜநிலயா ஶுக்லவர்ணா ஷடானனா ||
மஜ்ஜா ஸம்ஸ்தா ஹம்ஸவதீ முக்ய ஶக்தி ஸமன்விதா |
ஹரித்ரான்னைக ரஸிகா ஹாகினீ ரூபதாரிணீ ||
ஸஹஸ்ரதள பத்மஸ்தா ஸர்வவர்ணோப ஶோபிதா |
ஸர்வாயுததரா ஶுக்ல ஸம்ஸ்திதா ஸர்வதோமுகீ ||
ஸர்வௌதன ப்ரீதசித்தா யாகின்யம்பா ஸ்வரூபிணீ |
ஸ்வாஹா ஸ்வதா மதிர் மேதா ஶ்ருதி ஸ்ம்ருதி ரனுத்தமா ||
புண்யகீர்த்தி: புண்யலப்யா புண்யஶ்ரவண கீர்த்தனா |
புலோமஜார்ச்சிதா பந்த மோசனீ பந்துராலகா ||
விமர்ஶரூபிணீ வித்யா வியதாதி ஜகத்ப்ரஸூ: |
ஸர்வவ்யாதி ப்ரஶமனீ ஸர்வம்ருத்யு நிவாரிணீ ||
அக்ரகண்யா அசிந்த்யரூபா கலிகல்மஷ நாஶினீ |
காத்யாயனீ காலஹந்த்ரீ கமலாக்ஷ நிஷேவிதா ||
தாம்பூல பூரிதமுகீ தாடிமீ குஸுமப்ரபா |
ம்ருகாக்ஷீ மோஹினீ முக்யா ம்ருடானீ மித்ரரூபிணீ ||
நித்யத்ருப்தா பக்தநிதி: நியந்த்ரீ நிகிலேஶ்வரீ |
மைத்ர்யாதி வாஸனா லப்யா மஹாப்ரளய ஸாக்ஷிணீ ||

रक्तवर्णा मांसनिष्ठा गुडान्नप्रीतमानसा ।
समस्तभक्तसुखदा लाकिन्यम्बास्वरूपिणी ।
स्वाधिष्ठानाम्बुजगता चतुर्वक्त्रमनोहरा ।
शूलाद्यायुधसम्पन्ना पीतवर्णाऽतिगर्विता ॥
मेदोनिष्ठा मधुप्रीता वन्दिन्यादिसमन्विता ।
दध्यन्नासक्तहृदया काकिनीरूपधारिणी ॥
मूलाधाराम्बुजारूढा पञ्चवक्त्राऽस्थिसंस्थिता ।
अङ्कुशादिप्रहरणा वरदादिनिषेविता ॥
मुद्गौदनासक्तचित्ता साकिन्यम्बास्वरूपिणी ।
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना ॥
मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता ।
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी ॥
सहस्रदलपद्मस्था सर्ववर्णोपशोभिता ।
सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी ॥
सर्वौदनप्रीतचित्ता याकिन्यम्बास्वरूपिणी ।
स्वाहा स्वधा मतिर्मेधा श्रुतिः स्मृतिरनुत्तमा ॥
पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना ।
पुलोमजार्चिता बन्धमोचनी बन्धुरालका ॥
विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः ।
सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी ॥
अग्रगण्याऽचिन्त्यरूपा कलिकल्मषनाशिनी ।
कात्यायनी कालहन्त्री कमलाक्षनिषेविता ॥
ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥
नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी ।
मैत्र्यादिवासनालभ्या महाप्रलयसाक्षिणी ॥

பராஶக்தி: பராநிஷ்டா ப்ரஜ்ஞான கனரூபிணீ |
மாத்வீ பானலஸா மத்தா மாத்ருகா வர்ணரூபிணீ ||
மஹாகைலாஸ நிலயா ம்ருணாள ம்ருது தோர்லதா |
மஹநீயா தயாமூர்த்தி: மஹாஸாம்ராஜ்ய ஶாலினீ ||
ஆத்மவித்யா மஹாவித்யா ஶ்ரீவித்யா காமஸேவிதா |
ஶ்ரீஷோடஶாக்ஷரீ வித்யா த்ரிகூடா காமகோடிகா ||
கடாக்ஷ கிங்கரீபூத கமலா கோடி ஸேவிதா |
ஶிரஸ்ஸ்திதா சந்த்ரநிபா பாலஸ்தேந்த்ர தனுப்ரபா ||
ஹ்ருதயஸ்தா ரவிப்ரக்யா த்ரிகோணாந்தர தீபிகா |
தாக்ஷாயணீ தைத்யஹந்த்ரீ தக்ஷயஜ்ஞ விநாஶினீ
தராந்தோலித தீர்காக்ஷீ தரஹாஸோஜ்வலந் முகீ |
குருமூர்த்திர் குணநிதி: கோமாதா குஹஜன்மபூ: ||
தேவேஶீ தண்டநீதிஸ்தா தஹராகாஶ ரூபிணீ |
ப்ரதிபந் முக்ய ராகாந்த திதிமண்டல பூஜிதா ||
கலாத்மிகா கலாநாதா காவ்யாலாப விமோதினீ |
ஸசாமரரமாவாணீ ஸவ்யதக்ஷிண ஸேவிதா ||
ஆதிஶக்திரமேயாத்மா பரமா பாவனாக்ருதி: |
அனேக கோடி ப்ரஹ்மாண்ட ஜனனீ திவ்ய விக்ரஹா ||
க்லீங்காரீ கேவலா குஹ்யா கைவல்யபத தாயினீ |
த்ரிபுரா த்ரிஜகத்வந்த்யா த்ரிமூர்த்திஸ்த்ரிதஶேஶ்வரீ ||
த்ர்யக்ஷரீ திவ்யகந்தாட்யா ஸிந்தூர திலகாஞ்சிதா |
உமா ஶைலேந்த்ரதனயா கௌரீ கந்தர்வஸேவிதா ||
விஶ்வகர்பா ஸ்வர்ணகர்பா வரதா வாகதீஶ்வரீ |
த்யானகம்யா பரிச்சேத்யா ஞானதா ஞானவிக்ரஹா ||
ஸர்வவேதாந்த ஸம்வேத்யா ஸத்யானந்த ஸ்வரூபிணீ |
லோபாமுத்ரார்ச்சிதா, லீலாக்லுப்த ப்ரஹ்மாண்டமண்டலா

परा शक्तिः परानिष्ठा प्रज्ञानघनरूपिणी ।
माध्वीपानालसा मत्ता मातृकावर्णरूपिणी ॥
महाकैलासनिलया मृणालमृदुदोर्लता ।
महनीया दयामूर्तिर्महासाम्राज्यशालिनी ॥
आत्मविद्या महाविद्या श्रीविद्या कामसेविता । २३५
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥
कटाक्षकिङ्करीभूतकमलाकोटिसेविता ।
शिरः स्थिता चन्द्रनिभा भालस्थेन्द्रधनुःप्रभा ॥
हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका ।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी ॥ २४०
दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः ॥
देवेशी दण्डनीतिस्था दहराकाशरूपिणी ।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता ॥
कलात्मिका कलानाथा काव्यालापविनोदिनी । २४५
सचामररमावाणीसव्यदक्षिणसेविता ॥
आदिशक्तिरमेयात्मा परमा पावनाकृतिः ।
अनेककोटिब्रह्माण्डजननी दिव्यविग्रहा ॥
क्लींकारी केवला गुह्या कैवल्यपददायिनी ।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥ २५०
त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता ।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता ॥
विश्वगर्भा स्वर्णगर्भा वरदा वागधीश्वरी ।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ।
सर्ववेदान्तसंवेद्या सत्यानन्दस्वरूपिणी । २५५
लोपामुद्रार्चिता लीलाक्लृप्तब्रह्माण्डमण्डला ॥

அத்ருஸ்யா த்ருஸ்ய ரஹிதா விஜ்ஞாத்ரீ வேத்ய வர்ஜிதா |
யோகினீ யோகதா யோக்யா யோகானந்தா யுகந்தரா
இச்சாஶக்தி ஞானஶக்தி க்ரியாஶக்தி ஸ்வரூபிணீ |
ஸர்வாதாரா ஸுப்ரதிஷ்டா ஸதஸத்ரூபதாரிணீ ||
அஷ்டமூர்த்திரஜா ஜைத்ரீ லோகயாத்ரா விதாயினீ |
ஏகாகினீ பூமரூபா நிர்த்வைதா த்வைத வர்ஜிதா ||
அன்னதா வஸுதா வ்ருத்தா ப்ரஹ்மாத்மைக்ய ஸ்வரூபிணீ |
ப்ருஹதீ ப்ராஹ்மணீ ப்ராஹ்மீ ப்ரஹ்மானந்தா பலிப்ரியா ||
பாஷாரூபா ப்ருஹத்ஸேனா பாவாபாவ விவர்ஜிதா |
ஸுகாராத்யா ஶுபகரீ ஶோபனா ஸுலபா கதி꞉ ||
ராஜராஜேஸ்வரீ ராஜ்யதாயினீ ராஜ்யவல்லபா |
ராஜத்க்ருபா ராஜபீடநிவேஶித நிஜாஶ்ரிதா ||
ராஜ்யலக்ஷ்மீ꞉ கோஶநாதா சதுரங்க பலேஶ்வரீ |
ஸாம்ராஜ்ய தாயினீ ஸத்யஸந்தா ஸாகர மேகலா ||
தீக்ஷிதா தைத்ய ஶமனீ ஸர்வ லோக வஶங்கரீ |
ஸர்வார்த்த தாத்ரீ ஸாவித்ரீ ஸச்சிதானந்த ரூபிணீ ||
தேஶகாலா பரிச்சின்னா ஸர்வகா ஸர்வமோஹினீ |
ஸரஸ்வதீ ஶாஸ்த்ரமயீ குஹாம்பா குஹ்யரூபிணீ ||
ஸர்வோபாதி விநிர்முக்தா ஸதாஶிவ பதிவ்ரதா |
ஸம்ப்ரதாயேஶ்வரீ ஸாத்வீ குருமண்டல ரூபிணீ ||
குலோத்தீர்ணா பகாராத்யா மாயா மதுமதீ மஹீ |
கணாம்பா குஹ்யகாராத்யா கோமலாங்கீ குருப்ரியா ||
ஸ்வதந்த்ரா ஸர்வதந்த்ரேஶீ தக்ஷிணாமூர்த்தி ரூபிணீ
ஸனகாதி ஸமாராத்யா ஶிவஜ்ஞான ப்ரதாயினீ ||
சித்கலானந்த கலிகா ப்ரேமரூபா ப்ரியங்கரீ |
நாமபாராயண ப்ரீதா நந்திவித்யா நடேஶ்வரீ ||

अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
योगिनी योगदा योग्या योगानन्दा युगन्धरा ॥
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी । २६०
अष्टमूर्तिरजा जैत्री लोकयात्राविधायिनी ।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥
अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी ।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥
भाषारूपा बृहत्सेना भावाभावविवर्जिता । २६५
सुखाराध्या शुभकरी शोभना सुलभागतिः ॥
राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ।
राजत्कृपा राजपीठनिवेशितनिजाश्रिता ॥
राज्यलक्ष्मीः कोशनाथा चतुरङ्गबलेश्वरी ।
साम्राज्यदायिनी सत्यसन्धा सागरमेखला ॥ २७०
दीक्षिता दैत्यशमनी सर्वलोकवशङ्करी ।
सर्वार्थदात्री सावित्री सच्चिदानन्दरूपिणी ॥
देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी ॥
सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता । २७५
सम्प्रदायेश्वरी साध्वी गुरुमण्डलरूपिणी ॥
कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ॥
स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्तिरूपिणी ।
सनकादिसमाराध्या शिवज्ञानप्रदायिनी ॥ २८०
चित्कलानन्दकलिका प्रेमरूपा प्रियङ्करी ।
नामपारायणप्रीता नन्दिविद्या नटेश्वरी ।

மித்யா ஜகததிஷ்டானா முக்திதா முக்திரூபிணீ |
லாஸ்யப்ரியா லயகரீ லஜ்ஜா ரம்பாதி வந்திதா ||
பவதாவ ஸுதாவ்ருஷ்டி: பாபாரண்ய தவானலா |
தௌர்பாக்ய தூலவாதூலா ஜராத்வாந்த ரவிப்ரபா ||
பாக்யாப்தி சந்த்ரிகா பக்த சித்தகேகி கநாகநா |
ரோகபர்வத தம்போலி: ம்ருத்யு தாரு குடாரிகா ||
மஹேஶ்வரீ மஹாகாளீ மஹாக்ராஸா மஹாஶநா |
அபர்ணா சண்டிகா சண்ட முண்டாஸுர நிஷூதினீ ||
க்ஷராக்ஷராத்மிகா ஸர்வ லோகேஶீ விஶ்வதாரிணீ |
த்ரிவர்கதாத்ரீ ஸுபகா த்ர்யம்பகா த்ரிகுணாத்மிகா ||
ஸ்வர்காபவர்கதா ஶுத்தா ஜபாபுஷ்ப நிபாக்ருதி: |
ஓஜோவதீ த்யுதிதரா யஜ்ஞரூபா ப்ரியவ்ரதா ||
துராராத்யா துராதர்ஷா பாடலீ குஸுமப்ரியா |
மஹதீ மேருநிலயா மந்தார குஸுமப்ரியா ||
வீராராத்யா விராட்ரூபா விரஜா விஶ்வதோமுகீ |
ப்ரத்யக்ரூபா பராகாஶா ப்ராணதா ப்ராணரூபிணீ ||
மார்த்தாண்ட பைரவாராத்யா மந்த்ரிணீந்யஸ்தராஜ்யதூ: |
த்ரிபுரேஶீ ஜயத்ஸேனா நிஸ்த்ரைகுண்யா பராபரா ||
ஸத்யஜ்ஞானாநந்தரூபா ஸாமரஸ்ய பராயணா |
கபர்தினீ கலாமாலா காமதுக் காமரூபிணீ ||
கலாநிதி: காவ்யகலா ரஸஜ்ஞா ரஸஶேவதி: |
புஷ்டா புராதனா பூஜ்யா புஷ்கரா புஷ்கரேக்ஷணா ||
பரம் ஜ்யோதி: பரம் தாம பரமாணு: பராத்பரா |
பாஶஹஸ்தா பாஶஹந்த்ரீ பரமந்த்ர விபேதினீ ||
மூர்த்தா மூர்த்தா நித்யத்ருப்தா முனி மானஸ ஹம்ஸிகா
ஸத்யவ்ரதா ஸத்யரூபா ஸர்வாந்தர்யாமினீ ஸதீ ||

मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।
लास्यप्रिया लयकरी लज्जारम्भादिवन्दिता ॥
भवदावसुधावृष्टिः पापारण्यदवानला ।
दौर्भाग्यतूलवातूला जराध्वान्तरविप्रभा ॥
भाग्याब्धिचन्द्रिका भक्तचित्तकेकिघनाघना ।
रोगपर्वतदम्भोलिर्मृत्युदारुकुठारिका ॥
महेश्वरी महाकाली महाग्रासा महाशना ।
अपर्णा चण्डिका चण्डमुण्डासुरनिषूदिनी ॥
क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ॥
स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥
दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया ।
महती मेरुनिलया मन्दारकुसुमप्रिया ॥
वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ।
मार्ताण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥
सत्यज्ञानानन्दरूपा सामरस्यपरायणा ।
कपर्दिनी कलामाला कामधुक्कामरूपिणी ॥
कलानिधिः काव्यकलारसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥
परंज्योतिः परन्धाम परमाणुः परात्परा ।
पाशहस्ता पाशहन्त्री परमन्त्रविभेदिनी ॥
मूर्ताऽमूर्ता नित्यतृप्ता मुनिमानसहंसिका ।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती ॥

ப்ரஹ்மாணீ ப்ரஹ்மஜனனீ பஹுரூபா புதார்ச்சிதா |
ப்ரஸவித்ரீ ப்ரசண்டாக்ஞா ப்ரதிஷ்டா ப்ரகடாக்ருதி꞉ ‖
ப்ராணேஶ்வரீ ப்ராணதாத்ரீ பஞ்சாஶத் பீடரூபிணீ |
விஶ்ருங்கலா விவிக்தஸ்தா வீரமாதா வியத்ப்ரஸூ꞉ ‖
முகுந்தா முக்திநிலயா மூலவிக்ரஹ ரூபிணீ |
பாவக்ஞா பவரோகக்னீ பவசக்ர ப்ரவர்த்தினீ
சந்தஸ்ஸாரா ஶாஸ்த்ரஸாரா மந்த்ரஸாரா தலோதரீ |
உதாரகீர்த்தி ருத்தாம வைபவா வர்ணரூபிணீ ‖
ஜன்ம ம்ருத்யு ஜராதப்த ஜனவிஶ்ராந்தி தாயினீ |
ஸர்வோபநிஷதுத்குஷ்டா ஶாந்த்யதீத கலாத்மிகா ‖
கம்பீரா ககநாந்தஸ்தா கர்விதா கானலோலுபா |
கல்பனா ரஹிதா காஷ்டா காந்தா காந்தார்த்த விக்ரஹா ‖
கார்ய காரண நிர்முக்தா காமகேளீ தரங்கிதா |
கனத் கனகதாடங்கா லீலாவிக்ரஹ தாரிணீ ‖
அஜா க்ஷயவிநிர்முக்தா முக்தா க்ஷிப்ர ப்ரஸாதினீ |
அந்தர்முக ஸமாராத்யா பஹிர்முக ஸுதுர்லபா ‖
த்ரயீ த்ரிவர்க நிலயா த்ரிஸ்தா த்ரிபுரமாலினீ |
நிராமயா நிராலம்பா ஸ்வாத்மாராமா ஸுதாஸ்ருதி꞉ ‖
ஸம்ஸார பங்க நிர்மக்ன ஸமுத்தரண பண்டிதா |
யஜ்ஞப்ரியா யஜ்ஞகர்த்ரீ யஜமான ஸ்வரூபிணீ ‖
தர்மாதாரா தனாத்யக்ஷா தன தான்ய விவர்த்தினீ |
விப்ரப்ரியா விப்ரரூபா விஶ்வ ப்ரமணகாரிணீ ‖
விஶ்வக்ராஸா வித்ருமாபா வைஷ்ணவீ விஷ்ணுரூபிணீ |
அயோனிர் யோனிநிலயா கூடஸ்தா குலரூபிணீ ‖
வீரகோஷ்டீ ப்ரியா வீரா நைஷ்கர்ம்யா நாதரூபிணீ |
விஜ்ஞான கலனா கல்யா விதக்தா பைந்தவாஸனா ‖

ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचण्डाज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ ३१०
प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी ।
विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः ॥
मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी ।
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी ॥
छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी । ३१५
उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ॥
जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी ।
सर्वोपनिषदुद्घुष्टा शान्त्यतीतकलात्मिका ॥
गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।
कल्पनारहिता काष्ठाऽकान्ता कान्तार्धविग्रहा ॥ ३२०
कार्यकारणनिर्मुक्ता कामकेलितरङ्गिता ।
कनत्कनकताटङ्का लीलाविग्रहधारिणी ॥
अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी ।
अन्तर्मुखसमाराध्या बहिर्मुखसुदुर्लभा ॥
त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी । ३२५
निरामया निरालम्बा स्वात्मारामा सुधासृतिः ॥
संसारपङ्कनिर्मग्नसमुद्धरणपण्डिता ।
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी ॥
धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी ।
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी ॥ ३३०
विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ॥
वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी ।
विज्ञानकलना कल्या विदग्धा बैन्दवासना ॥

தத்வாதிகா தத்வமயீ தத்வமர்த்த ஸ்வரூபிணீ |
ஸாமகானப்ரியா ஸௌம்யா ஸதாஶிவ குடும்பினீ ||
ஸவ்யாபஸவ்ய மார்கஸ்தா ஸர்வாபத்வி நிவாரிணீ |
ஸ்வஸ்தா ஸ்வபாவ மதுரா தீரா தீரஸமர்ச்சிதா ||
சைதன்யார்க்ய ஸமாராத்யா சைதன்ய குஸுமப்ரியா |
ஸதோதிதா ஸதா துஷ்டா தருணாதித்ய பாடலா ||
தக்ஷிணா தக்ஷிணாராத்யா தரஸ்மேர முகாம்புஜா |
கௌலினீ கேவலானர்க்ய கைவல்யபத தாயினீ ||
ஸ்தோத்ரப்ரியா ஸ்துதிமதீ ஶ்ருதி ஸம்ஸ்துத வைபவா |
மனஸ்வினீ மானவதீ மஹேஶீ மங்களா க்ருதி: ||
விஶ்வமாதா ஜகத்தாத்ரீ விஶாலாக்ஷீ விராகிணீ |
ப்ரகல்பா பரமோதாரா பராமோதா மனோமயீ ||
வ்யோமகேஶீ விமானஸ்தா வஜ்ரிணீ வாமகேஶ்வரீ |
பஞ்சயஜ்ஞப்ரியா பஞ்ச ப்ரேதமஞ்சாதி ஶாயினீ ||
பஞ்சமீ பஞ்சபூதேஶீ பஞ்ச ஸங்க்யோபசாரிணீ |
ஶாஶ்வதீ ஶாஶ்வதைஶ்வர்யா ஶர்மதா ஶம்புமோஹினீ ||
தராதரஸுதா தன்யா தர்மிணீ தர்மவர்த்தினீ |
லோகாதீதா குணாதீதா ஸர்வாதீதா ஶமாத்மிகா ||
பந்தூக குஸும ப்ரக்யா பாலா லீலா வினோதினீ |
ஸுமங்கலீ ஸுககரீ ஸுவேஷாட்யா ஸுவாஸினீ ||
ஸுவாஸின்யர்ச்சன ப்ரீதா ஶோபனா ஶுத்தமானஸா |
பிந்து தர்ப்பண ஸந்துஷ்டா பூர்வஜா த்ரிபுராம்பிகா ||
தஶமுத்ரா ஸமாராத்யா த்ரிபுரா ஶ்ரீவஶங்கரீ |
ஜ்ஞானமுத்ரா ஜ்ஞானகம்யா ஜ்ஞானஜ்ஞேய ஸ்வரூபிணீ ||
யோனிமுத்ரா த்ரிகண்டேஶீ த்ரிகுணாம்பா த்ரிகோணகா |
அனகாத்புத சாரித்ரா வாஞ்சிதார்த்த ப்ரதாயினீ ||

तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी । ३३५
सामगानप्रिया सौम्या सदाशिवकुटुम्बिनी ॥
सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी ।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥
चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया ।
सदोदिता सदा तुल्या तरुणादित्यपाटला ॥ ३४०
दक्षिणा दक्षिणाराध्या दरस्मेरमुखाम्बुजा ।
कौलिनी केवलाऽनर्घ्यकैवल्यपददायिनी ॥
स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा ।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥
विश्वमाता जगद्धात्री विशालाक्षी विरागिणी । ३४५
प्रगल्भा परमोदारा परामोदा मनोमयी ॥
व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी ॥
पञ्चमी पञ्चभूतेशी पञ्चसङ्ख्योपचारिणी ।
शाश्वती शाश्वतैश्वर्या शर्मदा शम्भुमोहिनी ॥ ३५०
धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।
लोकातीता गुणातीता सर्वातीता शमात्मिका ॥
बन्धूककुसुमप्रख्या बाला लीलाविनोदिनी ।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥
सुवासिन्यर्चनप्रीता शोभना शुद्धमानसा । ३५५
बिन्दुतर्पणसन्तुष्टा पूर्वजा त्रिपुराम्बिका ॥
दशमुद्रासमाराध्या त्रिपुरा श्रीवशङ्करी ।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी ॥
योनिमुद्रा त्रिखण्डेशी त्रिगुणाऽम्बा त्रिकोणगा ।
अनघाऽद्भुतचारित्रा वाञ्छितार्थप्रदायिनी ॥ ३६०

அப்யாஸாதிஶய ஜ்ஞாதா ஷடத்வாதீத ரூபிணீ |
அவ்யாஜ கருணாமூர்த்தி: அஜ்ஞான த்வாந்த தீபிகா || (181)
ஆபாலகோப விதிதா ஸர்வானுல்லங்க்ய ஶாஸனா |
ஸ்ரீசக்ரராஜ நிலயா ஸ்ரீமத் த்ரிபுர ஸுந்தரீ || (182)
ஸ்ரீஶிவா ஸ்ரீஶிவஶக்த்யைக்ய ரூபிணீ லலிதாம்பிகா |
ஏவம் ஸ்ரீலலிதா தேவ்யா நாம்னாம் ஸாஹஸ்ரகம் ஜகு: ||

இதி ஸ்ரீ ப்ரஹ்மாண்ட புராணே உத்தரகாண்டே ஹயக்ரீவாகஸ்த்ய ஸம்வாதே ஸ்ரீ லலிதா ஸஹஸ்ரநாம ஸ்தோத்ர கதநம்நாம த்விதீயோ த்யாய:

பலஶ்ருதி:

(உத்தரபாகம்)

இத்யேதந் நாமஸாஹஸ்ரம் கதிதம் தே கடோத்பவ |
ரஹஸ்யானாம் ரஹஸ்யம் ச லலிதா ப்ரீதி தாயகம் ||
அநேன ஸத்ருஶம் ஸ்தோத்ரம் ந பூதம் ந பவிஷ்யதி |
ஸர்வ ரோகப்ரஶமனம் ஸர்வ ஸம்பத் ப்ரவர்தனம் ||
ஸர்வாப ம்ருத்யு ஶமனம் கால ம்ருத்யு நிவாரணம் |
ஸர்வ ஜ்வரார்த்தி ஶமனம் தீர்காயுஷ்ய ப்ரதாயகம் ||
புத்ரப்ரதம புத்ராணாம் புருஷார்த்த ப்ரதாயகம் |
இதம் விஶேஷாத் ஸ்ரீ தேவ்யா: ஸ்தோத்ரம் ப்ரீதிவிதாயகம் ||
ஜபேந் நித்யம் ப்ரயத்னேந லலிதோபாஸ்தி தத்பர: ||
ப்ராத ஸ்நாத்வா விதானேன ஸந்த்யா கர்ம ஸமாப்ய ச ||
பூஜா க்ருஹம் ததோ கத்வா சக்ரராஜம் ஸமர்ச்சயேத் |
வித்யாம் ஜபேத் ஸஹஸ்ரம் வா த்ரிஶதம் ஶதமேவ வா |

अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी ।
अव्याजकरुणामूर्तिरज्ञानध्वान्तदीपिका ॥
आबालगोपविदिता सर्वानुलङ्घ्यशासना ।
श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी ॥
श्रीशिवा शिवशक्त्यैक्यरूपिणी ललिताम्बिका । ३६५
एवं श्रीललितादेव्या नाम्नां साहस्रकं जगुः ॥

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्यसंवादे श्रीललितासहस्रनामस्तोत्रकथनं नाम द्वितीयोऽध्यायः ॥

॥ फलश्रुतिः ॥

उत्तरभागः

इत्येतन्नामसाहस्रं कथितं ते घटोद्भव ।
रहस्यानां रहस्यं च ललिताप्रीतिदायकम् ॥
अनेन सदृशं स्तोत्रं न भूतं न भविष्यति ।
सर्वरोगप्रशमनं सर्वसम्पत्प्रवर्धनम् ॥
सर्वापमृत्युशमनं कालमृत्युनिवारणम् । ५
सर्वज्वरार्तिशमनं दीर्घायुष्यप्रदायकम् ॥
पुत्रप्रदमपुत्राणां पुरुषार्थप्रदायकम् ।
इदं विशेषाच्छ्रीदेव्याः स्तोत्रं प्रीतिविधायकम् ॥
जपेन्नित्यं प्रयत्नेन ललितोपास्तितत्परः ।
प्रातः स्नात्वा विधानेन सन्ध्याकर्म समाप्य च ॥ १०
पूजागृहं ततो गत्वा चक्रराजं समर्चयेत् ।
विद्यां जपेत् सहस्रं वा त्रिशतं शतमेव वा ॥

ரஹஸ்ய நாம ஸாஹஸ்ரம் இதம் பஶ்சாத் படேந் நர꞉ |
ஜந்ம மத்யே ஸக்ருச்சாபி ய ஏதத்படதே ஸுதீ꞉ ||
தஸ்ய புண்யபலம் வக்ஷ்யே ஶ்ருணு த்வம் கும்பஸம்பவ |
கங்காதி ஸர்வ தீர்த்தேஷு ய꞉ ஸ்நாயாத் கோடிஜந்மஸு ||
கோடிலிங்க ப்ரதிஷ்டாயாம் ய꞉ குர்யாதவிமுக்தகே |
குருக்ஷேத்ரே து யோதத்யாத் கோடி வாரம் ரவிக்ரஹே ||
கோடிம் ஸுவர்ணபாராணாம் ஶ்ரோத்ரியேஷு த்விஜந்மஸு |
ய꞉ கோடிம் ஹயமேதாநாம் ஆஹரேத் காங்கரோதஸி ||
ஆசரேத் கூபகோடீர்யோ நிர்ஜலே மருபூதலே |
துர்பிக்ஷே ய꞉ ப்ரதிதிநம் கோடி ப்ராஹ்மண போஜநம் ||
ஶ்ரத்தயா பரயா குர்யாத் ஸஹஸ்ரம் பரிவத்ஸராந் |
தத்புண்யம் கோடிகுணிதம் லபேத் புண்ய மநுத்தமம் ||
ரஹஸ்ய நாம ஸாஹஸ்ரே நாம்நோப்யேகஸ்ய கீர்த்தநாத் |
ரஹஸ்ய நாம ஸாஹஸ்ரே நாமைகமபி ய꞉ படேத் ||
தஸ்ய பாபாநி நஶ்யந்தி மஹாந்த்யபி ந ஸம்ஶய꞉ |
நித்யகர்மாநநுஷ்டாநாத் நிஷித்த கரணாதபி ||
யத்பாபம் ஜாயதே பும்ஸாம் தத்ஸர்வம் நஶ்யதி த்ருவம் |
பஹுநாத்ர கிமுக்தேந ஶ்ருணு த்வம் கும்பஸம்பவ ||
அத்ரைக நாம்நோ யா ஶக்தி꞉ பாதகாநாம் நிவர்த்தநே |
தந்நிவர்த்யமகம் கர்த்தும் நாலம் லோகாஶ் சதுர்தஶ ||
யஸ் த்யக்த்வா நாமஸாஹஸ்ரம் பாபஹாநி.மபீப்ஸதி |
ஸஹி ஶீத நிவ்ருத்யர்த்தம் ஹிமஶைலம் நிஷேவதே ||
பக்தோ ய꞉ கீர்த்தயேந்நித்யம் இதம் நாம ஸஹஸ்ரகம் |
தஸ்மை ஸ்ரீலலிதா தேவீ ப்ரீதாபீஷ்டம் ப்ரயச்சதி ||
அகீர்த்தயந்நிதம் ஸ்தோத்ரம் கதம் பக்தோ பவிஷ்யதி |
நித்யம் ஸங்கீர்த்தநாஶக்த꞉ கீர்த்தயேத் புண்யவாஸரே ||

रहस्यनामसाहस्रमिदं पश्चात्पठेन्नरः ।
जन्ममध्ये सकृच्चापि य एतत्पठते सुधीः ॥
तस्य पुण्यफलं वक्ष्ये शृणु त्वं कुम्भसम्भव ।
गङ्गादिसर्वतीर्थेषु यः स्नायात्कोटिजन्मसु ॥
कोटिलिङ्गप्रतिष्ठां च यः कुर्यादविमुक्तके ।
कुरुक्षेत्रे तु यो दद्यात्कोटिवारं रविग्रहे ॥
कोटिं सौवर्णभाराणां श्रोत्रियेषु द्विजन्मसु ।
यः कोटिं हयमेधानामाहरेद्गाङ्गरोधसि ॥
आचरेत्कूपकोटिर्यो निर्जले मरुभूतले ।
दुर्भिक्षे यः प्रतिदिनं कोटिब्राह्मणभोजनम् ॥
श्रद्धया परया कुर्यात्सहस्रपरिवत्सरान् ।
तत्पुण्यं कोटिगुणितं लभेत्पुण्यमनुत्तमम् ॥
रहस्यनामसाहस्रे नाम्नोऽप्येकस्य कीर्तनात् ।
रहस्यनामसाहस्रे नामैकमपि यः पठेत् ॥
तस्य पापानि नश्यन्ति महान्त्यपि न संशयः ।
नित्यकर्माननुष्ठानान्निषिद्धकरणादपि ॥
यत्पापं जायते पुंसां तत्सर्वं नश्यति ध्रुवम् ।
बहुनात्र किमुक्तेन शृणु त्वं कुम्भसम्भव ॥
अत्रैकनाम्नो या शक्तिः पातकानां निवर्तने ।
तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश ॥
यस्त्यक्त्वा नामसाहस्रं पापहानिमभीप्सति ।
स हि शीतनिवृत्त्यर्थं हिमशैलं निषेवते ॥
भक्तो यः कीर्तयेन्नित्यमिदं नामसहस्रकम् ।
तस्मै श्रीललितादेवी प्रीताभीष्टं प्रयच्छति ॥
अकीर्तयन्निदं स्तोत्रं कथं भक्तो भविष्यति ।
नित्यं सङ्कीर्तनाशक्तः कीर्तयेत्पुण्यवासरे ॥

ஸங்க்ராந்தௌ விஷுவே சைவ ஸ்வஜன்மத்ரிதயேஷ்வயனே |
நவம்யாம் வா சதுர்தஶ்யாம் ஸிதாயாம் ஶுக்ரவாஸரே ||
கீர்த்தயேந் நாம ஸாஹஸ்ரம் பௌர்ணமாஸ்யாம் விஶேஷத꞉ |
பௌர்ணமாஸ்யாம் சந்த்ரபிம்பே த்யாத்வா ஶ்ரீலலிதாம்பிகாம் ||
பஞ்சோபசாரைஸ் ஸம்பூஜ்ய படேந் நாமஸஹஸ்ரகம் |
ஸர்வே ரோகா꞉ ப்ரணஶ்யந்தி தீர்காயுஷ்யஞ்ச விந்ததி ||
அயமாயுஷ்கரோ நாம ப்ரயோக꞉ கல்பசோதித꞉ |
ஜ்வரார்த்தம் ஶிரஸி ஸ்ப்ருஷ்ட்வா படேந் நாமஸஹஸ்ரகம் ||
தத்க்ஷணாத் ப்ரஶமம் யாதி ஶிரஸ்தோதோ ஜ்வரோபி ச |
ஸர்வ வ்யாதி நிவ்ருத்யர்த்தம் ஸ்ப்ருஷ்ட்வா பஸ்ம ஜபேதிதம் ||
தத்பஸ்ம தாரணாதேவ நஶ்யந்தி வ்யாதய꞉ க்ஷணாத் |
ஜலம் ஸம்மந்த்ர்ய கும்பஸ்த்தம் நாம ஸாஹஸ்ரதோ முனே ||
தத்பஸ்ம தாரணாதேவ நஶ்யந்தி வ்யாதய꞉ க்ஷணாத் |
ஜலம் ஸம்மந்த்ர்ய கும்பஸ்த்தம் த்யாத்வா ஶ்ரீலலிதாம்பிகாம் ||
ய꞉ படேந் நாமஸாஹஸ்ரம் விஷம் தஸ்ய விநஶ்யதி |
வந்த்யானாம் புத்ரலாபாய நாம ஸாஹஸ்ர மந்த்ரிதம் ||
நவநீதம் ப்ரதத்யாத்து புத்ரலாபோ பவேத் த்ருவம் |
தேவ்யா꞉ பாஶேந ஸம்பத்தாமாக்ருஷ்டாமங்குஶேந ச ||
த்யாத்வாபீஷ்டாம் ஸ்த்ரியம் ராத்ரௌ ஜபேந் நாமஸஹஸ்ரகம்
ஆயாதி ஸ்வஸமீபம் ஸா யத்யப்யந்த꞉ புரங்கதா ||
ராஜா கர்ஷண காமஶ்சேத் ராஜாவஸத திங்முக꞉ |
த்ரிராத்ரம் ய꞉ படேதேதத் ஶ்ரீ தேவீ த்யானதத்பர꞉ ||
ஸ ராஜா பாரவஶ்யேந துரங்கம் வா மதங்கஜம் |
ஆருஹ்யாயாதி நிகடம் தாஸவத் ப்ரணிபத்ய ச ||
தஸ்மை ராஜ்யம் ச கோஶம் ச தாத்யேவ வஶம் கத꞉ |
ரஹஸ்ய நாம ஸாஹஸ்ரம் ய꞉ கீர்த்தயதி நித்யஶ꞉ ||

संक्रान्तौ विषुवे चैव स्वजन्मत्रितयेऽयने ।
नवम्यां वा चतुर्दश्यां सितायां शुक्रवासरे ॥
कीर्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः ।
पौर्णमास्यां चन्द्रबिम्बे ध्यात्वा श्रीललिताम्बिकाम् ॥
पञ्चोपचारैः सम्पूज्य पठेन्नामसहस्रकम् ।
सर्वे रोगाः प्रणश्यन्ति दीर्घायुष्यञ्च विन्दति ॥
अयमायुष्करो नाम प्रयोगः कल्पचोदितः ।
ज्वरार्तं शिरसि स्पृष्ट्वा पठेन्नामसहस्रकम् ॥
तत्क्षणात्प्रशमं याति शिरस्तोदो ज्वरोऽपि च ।
सर्वव्याधिनिवृत्त्यर्थं स्पृष्ट्वा भस्म जपेदिदम् ॥
तद्भस्मधारणादेव नश्यन्ति व्याधयः क्षणात् ।
जलं सम्मन्त्र्य कुम्भस्थं नामसाहस्रतो मुने ॥
अभिषिञ्चेद्ग्रहग्रस्तान्ग्रहा नश्यन्ति तत्क्षणात् ।
सुधासागरमध्यस्थां ध्यात्वा श्रीललिताम्बिकाम् ॥
यः पठेन्नामसाहस्रं विषं तस्य विनश्यति ।
वन्ध्यानां पुत्रलाभाय नामसाहस्रमन्त्रितम् ॥
नवनीतं प्रदद्यात्तु पुत्रलाभो भवेद्ध्रुवम् ।
देव्याः पाशेन सम्बद्धामाकृष्टामङ्कुशेन च ॥
ध्यात्वाभीष्टां स्त्रियं रात्रौ जपेन्नामसहस्रकम् ।
आयाति स्वसमीपं सा यद्यप्यन्तः पुरं गता ॥
राजाकर्षणकामश्चेद्राजावसथदिङ्मुखः ।
त्रिरात्रं यः पठेदेतच्छ्रीदेवीध्यानतत्परः ॥
स राजा पारवश्येन तुरङ्गं वा मतङ्गजम् ।
आरुह्यायाति निकटं दासवत्प्रणिपत्य च ॥
तस्मै राज्यं च कोशं च ददात्येव वशं गतः ।
रहस्यनामसाहस्रं यः कीर्तयति नित्यशः ॥

தன்முகாலோக மாத்ரேண முஹ்யேத் லோகத்ரயம் முனே |
யஸ்த்விதம் நாமஸாஹஸ்ரம் ஸக்ருத் படதி பக்திமான் ||
தஸ்ய யே ஶத்ரவஸ் தேஷாம் நிஹந்தா பரமேஶ்வர: |
யோ வாபிசாரம் குருதே நாம ஸாஹஸ்ரபாடகே ||
நிவர்த்ய தத் க்ரியாம் ஹந்யாத்தம் வை ப்ரத்யங்கிரா ஸ்வயம் |
யே க்ரூரத்ருஷ்ட்யா வீக்ஷந்தே நாம ஸாஹஸ்ர பாடகம் ||
தாநந்தான் குருதே க்ஷிப்ரம் ஸ்வயம் மார்த்தாண்ட பைரவ: |
தனம் யோ ஹரதே சோரை: நாம ஸாஹஸ்ர ஜாபின: ||
யத்ர குத்ர ஸ்திதம் வாபி க்ஷேத்ரபாலோ நிஹந்தி தம் |
வித்யாஸு குருதே வாதம் யோ வித்வான் நாமஜாபினா ||
தஸ்ய வாக் ஸ்தம்பனம் ஸத்ய: கரோதி நகுலேஶ்வரீ |
யோ ராஜா குருதே வைரம் நாம ஸாஹஸ்ர ஜாபினா ||
சதுரங்கபலம் தஸ்ய தண்டினீ ஸம்ஹரேத் ஸ்வயம் |
ய: படேந் நாம ஸாஹஸ்ரம் ஷண்மாஸம் பக்திஸம்யுத: ||
லக்ஷ்மீஸ் சாஞ்சல்ய ரஹிதா ஸதா திஷ்டதி தத்க்ருஹே |
மாஸமேகம் ப்ரதிதினம் த்ரிவாரம் ய: படேந் நர: ||
பாரதீ தஸ்ய ஜிஹ்வாக்ரே ரங்கே ந்ருத்யதி நித்யஶ: |
யஸ்த்வேகவாரம் படதி பக்ஷமாத்ரமதந்த்ரித: ||
முஹ்யந்தி காமவஶகா: ம்ருகாக்ஷ்யஸ் தஸ்ய வீக்ஷணாத் |
ய: படேந் நாமஸாஹஸ்ரம் ஜன்ம மத்யே ஸக்ருந் நர: ||
தத் த்ருஷ்டி கோசராஸ் ஸர்வே முச்யந்தே ஸர்வகில்பிஷை: |
யோ வேத்தி நாம ஸாஹஸ்ரம் தஸ்மை தேயம் த்விஜன்மனே ||
அன்னம் வஸ்த்ரம் தனம் தான்யம் நாந்யேப்யஸ்து கதாசன |
ஸ்ரீமந்த்ரராஜம் யோ வேத்தி ஸ்ரீசக்ரம் யஸ் ஸமர்ச்சதி ||
ய: கீர்த்தயதி நாமானி தம் ஸத்பாத்ரம் விதுர் புதா: |
தஸ்மை தேயம் ப்ரயத்னேன ஸ்ரீதேவீ பக்தி மிச்சதா ||

तन्मुखालोकमात्रेण मुह्येल्लोकत्रयं मुने ।
यस्त्विदं नामसाहस्रं सकृत्पठति भक्तिमान् ॥
तस्य ये शत्रवस्तेषां निहन्ता परमेश्वरः ।
ये वाभिचारं कुरुते नामसाहस्रपाठके ॥
निवर्त्य तत्क्रियां हन्यात्तं वै प्रत्यङ्गिरास्स्वयम् ।
ये क्रूरदृष्ट्या वीक्षन्ते नामसाहस्रपाठकम् ॥
तानन्धान्कुरुते क्षिप्रं स्वयं मार्तण्डभैरवः ।
धनं यो हरते चोरैर्नामसाहस्रजापिनः ॥
यत्र कुत्र स्थितं वापि क्षेत्रपालो निहन्ति तम् ।
विद्यासु कुरुते वादं यो विद्वान्नामजापिना ॥
तस्य वाक्स्तम्भनं सद्यः करोति नकुलेश्वरी ।
यो राजा कुरुते वैरं नामसाहस्रजापिना ॥
चतुरङ्गबलं तस्य दण्डिनी संहरेत्स्वयम् ।
यः पठेन्नामसाहस्रं षण्मासं भक्तिसंयुतः ॥
लक्ष्मीश्चाञ्चल्यरहिता सदा तिष्ठति तद्गृहे ।
मासमेकं प्रतिदिनं त्रिवारं यः पठेन्नरः ॥
भारती तस्य जिह्वाग्रे रङ्गे नृत्यति नित्यशः ।
यस्त्वेकवारं पठति पक्षमात्रमतन्द्रितः ॥
मुह्यन्ति कामवशगा मृगाक्ष्यस्तस्य वीक्षणात् ।
यः पठेन्नामसाहस्रं जन्ममध्ये सकृन्नरः ॥
तद्दृष्टिगोचरास्सर्वे मुच्यन्ते सर्वकिल्बिषैः ।
यो वेत्ति नामसाहस्रं तस्मै देयं द्विजन्मने ॥
अन्नं वस्त्रं च धान्यं च नान्येभ्यस्तु कदाचन ।
श्रीमन्त्रराजं यो वेत्ति श्रीचक्रं यः समर्चति ॥
यः कीर्तयति नामानि तं सत्पात्रं विदुर्बुधाः ।
तस्मै देयं प्रयत्नेन श्रीदेवीप्रीतिमिच्छता ॥

ந கீர்த்தயதி நாமாநி மந்த்ரராஜம் ந வேத்தி ய: |
பஶுதுல்யஸ் ஸ விஜ்ஞேய: தஸ்மை தத்தம் நிரர்த்தகம் ||
பரீக்ஷ்ய வித்யா விதுஷ: தேப்யோ தத்யாத் விசக்ஷண: |
ஸ்ரீமந்த்ரராஜ ஸத்ருஶோ யதா மந்த்ரோ ந வித்யதே ||
தேவதா லலிதா துல்யா யதா நாஸ்தி கடோத்பவ |
ரஹஸ்ய நாம ஸாஹஸ்ர துல்யா நாஸ்தி ததா ஸ்துதி: |
லிகித்வா புஸ்தகே யஸ்து நாமஸாஹஸ்ரமுத்தமம் |
ஸமர்ச்சயேத் ஸதா பக்த்யா தஸ்ய துஷ்யதி ஸுந்தரீ ||
பஹுநாத்ர கிமுக்தேந ஶ்ருணு த்வம் கும்பஸம்பவ |
நாநேந ஸத்ருஶம் ஸ்தோத்ரம் ஸர்வதந்த்ரேஷு த்ருஶ்யதே ||
தஸ்மா துபாஸகோ நித்யம் கீர்த்தயேதிதமாதராத் |
ஏபிர் நாமஸஹஸ்ரைஸ்து ஸ்ரீசக்ரம் யோர்சயேத் ஸக்ருத் ||
பத்மைர் வா துளஸீபுஷ்பை: கல்ஹாரைர்வா கதம்பகை: |
சம்பகைர் ஜாதிகுஸுமை: மல்லிகா கரவீரகை: ||
உத்பலைர் பில்வபத்ரைர் வா குந்தகேஸர பாடலை: |
அன்யைஸ் ஸுகந்திகுஸுமை: கேதகீ மாதவீ முகை: ||
தஸ்ய புண்யபலம் வக்தும் ந ஶக்னோதி மஹேஶ்வர: |
ஸா வேத்தி லலிதாதேவீ ஸ்வசக்ரார்சனஜம் பலம் ||
அன்யே கதம் விஜானீயு: ப்ரஹ்மாத்யாஸ் ஸ்வல்பமேதஸ: |
ப்ரதிமாஸம் பௌர்ணமாஸ்யாம் ஏபிர் நாமஸஹஸ்ரகை:
ராத்ரௌ யஶ் சக்ரராஜஸ்த்தாம் அர்ச்சயேத் பரதேவதாம் |
ஸ ஏவ லலிதாரூப: தத்ரூபா லலிதா ஸ்வயம் ||
ந தயோர் வித்யதே பேத: பேதக்ருத் பாபக்ருத் பவேத் |
மஹாநவம்யாம் யோ பக்த: ஸ்ரீதேவீம் சக்ரமத்யகாம் ||
அர்ச்சயேந் நாமஸாஹஸ்ரை: தஸ்ய முக்தி: கரே ஸ்திதா |
யஸ்து நாமஸஹஸ்ரேண ஶுக்ரவாரே ஸமர்ச்சயேத் ||

न कीर्तयति नामानि मन्त्रराजं न वेत्ति यः ।
पशुतुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम् ॥
परीक्ष्य विद्याविदुषस्तेभ्यो दद्याद्विचक्षणः ।
श्रीमन्त्रराजसदृशो यथा मन्त्रो न विद्यते ॥
देवता ललितातुल्या यथा नास्ति घटोद्भव । ९५
रहस्यनामसाहस्रतुल्या नास्ति तथा स्तुतिः ॥
लिखित्वा पुस्तके यस्तु नामसाहस्रमुत्तमम् ।
समर्चयेत्सदा भक्त्या तस्य तुष्यति सुन्दरी ॥
बहुनात्र किमुक्तेन शृणु त्वं कुम्भसम्भव ।
नानेन सदृशं स्तोत्रं सर्वतन्त्रेषु दृश्यते ॥ १००
तस्मादुपासको नित्यं कीर्तयेदिदमादरात् ।
एभिर्नामसहस्रैस्तु श्रीचक्रं योऽर्चयेत्सकृत् ॥
पद्मैर्वा तुलसीपुष्पैः कल्हारैर्वा कदम्बकैः ।
चम्पकैर्जातिकुसुमैः मल्लिकाकरवीरकैः ॥
उत्पलैर्बिल्वपत्रैर्वा कुन्दकेसरपाटलैः । १०५
अन्यैः सुगन्धिकुसुमैः केतकीमाधवीमुखैः ।
तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः ।
सा वेत्ति ललितादेवी स्वचक्रार्चनजं फलम् ॥
अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्पमेधस ।
प्रतिमासं पौर्णमास्यामेभिर्नामसहस्रकैः ॥ ११०
रात्रौ यश्चक्रराजस्थामर्चयेत्परदेवताम् ।
स एव ललितारूपस्तद्रूपा ललिता स्वयम् ॥
न तयोर्विद्यते भेदो भेदकृत्पापकृद्भवेत् ।
महानवम्यां यो भक्तः श्रीदेवीं चक्रमध्यगाम् ॥
अर्चयेन्नामसाहस्रैस्तस्य मुक्तिः करे स्थिता । ११५
यस्तु नामसहस्रेण शुक्रवारे समर्चयेत् ॥

சக்ரராஜே மஹாதேவீம் தஸ்ய புண்யபலம் ஶ்ருணு |
ஸாவான் காமானவாப்யேஹ ஸர்வ ஸௌபாக்ய ஸம்யுதஃ ||
புத்ர பௌத்ராதி ஸம்யுக்தோ புக்த்வா போகான் யதேப்ஸிதான் |
அந்தே ஸ்ரீ லலிதா தேவ்யாஃ ஸாயுஜ்ய மதிதுர்லபம் || 120
ப்ரார்த்தநீயம் ஶிவாத்யைஶ்ச ப்ராப்னோத்யேவ ந ஸம்ஶயஃ |
யஸ் ஸஹஸ்ரம் ப்ராஹ்மணாநாம் ஏபிர் நாம ஸஹஸ்ரகைஃ ||
ஸமர்ச்ய போஜயேத் பக்த்யா பாயஸாபூப ஷட்ரஸை: |
தஸ்மை ப்ரீணாதி லலிதா ஸ்வ ஸாம்ராஜ்யம் ப்ரயச்சதி||
ந தஸ்ய துர்லபம் வஸ்து த்ரிஷு லோகேஷு வித்யதே | 125
நிஷ்காம: கீர்த்தயேத் யஸ்து நாம ஸாஹஸ்ர முத்தமம் ||
ப்ரஹ்மஜ்ஞான மவாப்னோதி யேந முச்யேத பந்தநாத் |
தனார்த்தீ தனமாப்னோதி யஶோர்த்தீ சாப்னுயாத் யஶ: ||
வித்யார்த்தீ சாப்னுயாத் வித்யாம் நாம ஸாஹஸ்ர கீர்த்தனாத் |
நாநேந ஸத்ருஶம் ஸ்தோத்ரம் போகமோக்ஷப்ரதம் முனே|| 130
கீர்த்தனீயமிதம் தஸ்மாத் போகமோக்ஷார்த்திபிர் நரை: |
சதுராஶ்ரம நிஷ்டைஶ்ச கீர்த்தனீய மிதம் ஸதா ||
ஸ்வதர்ம ஸமனுஷ்டான கைவல்ய பரிபூர்த்தயே |
கலௌ பாபைக பஹுளே தர்மானுஷ்டான வர்ஜிதே ||
நாமஸங்கீர்த்தனம் முக்த்வா ந்ருணாம் நாந்யத் பாராயணம் | 135
லௌகிகாத் வசனாந் முக்யம் விஷ்ணு நாமானு கீர்த்தனம்||
விஷ்ணு நாமஸஹஸ்ராச்ச ஶிவநாமைக முத்தம் |
ஶிவநாம ஸஹஸ்ராச்ச தேவ்யா நாமைகமுத்தமம் ||
தேவீ நாமஸஹஸ்ராணி கோடிஶஸ்ஸந்தி கும்பஜ |
தேஷு முக்யம் தஶவிதம் நாம ஸாஹஸ்ர முச்யதே|| 140
ரஹஸ்ய நாமஸாஹஸ்ரம் இதம் ஶஸ்தம் தஶஸ்வபி |
தஸ்மாத் ஸங்கீர்த்தயேந் நித்யம் கலிதோஷ நிவ்ருத்தயே||

चक्रराजे महादेवीं तस्य पुण्यफलं शृणु ।
सर्वान्कामानवाप्येह सर्वसौभाग्यसंयुतः ॥
पुत्रपौत्रादिसंयुक्तो भुक्त्वा भोगान्यथेप्सितान् ।
अन्ते श्रीललितादेव्याः सायुज्यमतिदुर्लभम् ॥ १२०
प्रार्थनीय शिवाद्यैश्च प्राप्नोत्येव न संशयः ।
यः सहस्रं ब्राह्मणानामेभिर्नामसहस्रकैः ॥
समर्च्य भोजयेद्भक्त्या पायसाऽऽपूपषड्रसैः ।
तस्मै प्रीणाति ललिता स्वसाम्राज्य प्रयच्छति ॥
न तस्य दुर्लभं वस्तु त्रिषु लोकेषु विद्यते । १२५
निष्कामः कीर्तयेद्यस्तु नामसाहस्रमुत्तमम् ॥
ब्रह्मज्ञानमवाप्नोति येन मुच्येत बन्धनात् ।
धनार्थी धनमाप्नोति यशोऽर्थी चाप्नुयाद्यशः ॥
विद्यार्थी चाप्नुयाद्विद्यां नामसाहस्रकीर्तनात् ।
नानेन सदृशं स्तोत्रं भोगमोक्षप्रदं मुने ॥ १३०
कीर्तनीयमिदं तस्माद्भोगमोक्षार्थिभिर्नरैः ।
चतुराश्रमनिष्ठैश्च कीर्तनीयमिदं सदा ॥
स्वधर्मसमनुष्ठानवैकल्यपरिपूर्तये ।
कलौ पापैकबहुले धर्मानुष्ठानवर्जिते ॥
नामसङ्कीर्तनं मुक्त्वा नृणां नान्यत्परायणम् । १३५
लौकिकाद्वचनान्मुख्यं विष्णुनामानुकीर्तनम् ॥
विष्णुनामसहस्राच्च शिवनामैकमुत्तमम् ।
शिवनामसहस्राच्च देव्या नामैकमुत्तमम् ॥
देवीनामसहस्राणि कोटिशः सन्ति कुम्भज ।
तेषु मुख्यं दशविधं नामसाहस्रमुच्यते ॥ १४०
रहस्यनामसाहस्रमिदं शस्तं दशस्वपि ।
तस्मात्सङ्कीर्तयेन्नित्यं कलिदोषनिवृत्तये ॥

முக்யம் ஸ்ரீமாத்ரு நாமேதி ந ஜானந்தி விமோஹிதா: |
விஷ்ணு நாம பரா: கேசிச் சிவநாமபரா:பரே ||
ந கச்சிதபி லோகேஷு லலிதா நாம தத்பர: |
யேனான்ய தேவதா நாம கீர்த்திதம் ஜன்மகோடிஷு
தஸ்யைவ பவதி ச்ரத்தா ஸ்ரீதேவீ நாமகீர்த்தனே |
சரமே ஜன்மனி யதா ஸ்ரீவித்யோபாஸகோ பவேத் ||
நாம ஸஹஸ்ர பாடச்ச ததா சரமஜன்மனி |
யதைவ விரளா லோகே ஸ்ரீவித்யா ராஜவேதின: ||
ததைவ விரளா குஹ்ய நாம ஸாஹஸ்ர பாடகா: |
மந்த்ரராஜ ஜபச்சைவ சக்ரராஜார்ச்சனம் ததா ||
ரஹஸ்ய நாமபாடச்ச நால்பஸ்ய தபஸ: பலம் |
அபடந் நாம ஸாஹஸ்ரம் ப்ரீணயத் யோ மஹேச்வரீம் ||
ஸ சக்ஷுஷா விநா ரூபம் பச்யேதேவ விமூடதீ: |
ரஹஸ்ய நாம ஸாஹஸ்ரம் த்யக்த்வா யஸ் ஸித்திகாமுக: ||
ஸ போஜனம் விநா நூனம் க்ஷுந் நிவ்ருத்தி மபீப்ஸதி |
யோ பக்தோ லலிதாதேவ்யா: ஸ நித்யம கீர்த்தயேதிதம் ||
நாந்யதா ப்ரீயதே தேவீ கல்பகோடி சதைரபி |
தஸ்மாத் ரஹஸ்ய நாமானி ஸ்ரீமாது: ப்ரயத: படேத் ||
இதி தே கதிதம் ஸ்தோத்ரம் ரஹஸ்யம் கும்பஸம்பவ |
நா வித்யா வேதினே ப்ரூயாந் நாபக்தாய கதாசன ||
யதைவ கோப்யா ஸ்ரீவித்யா ததா கோப்யமிதம் முனே |
பசுதுல்யேஷு ந ப்ரூயாத் ஜனேஷு ஸ்தோத்ரமுத்தமம் ||
யோ ததாதி விமூடாத்மா ஸ்ரீவித்யா ரஹிதாய ச |
தஸ்மை குப்யந்தி யோகின்ய: ஸோனர்த்தஸ்ஸுமஹான் ஸ்ம்ருத: ||
ரஹஸ்ய நாமஸாஹஸ்ரம் தஸ்மாத் ஸங்கோபயேதிதம் |
ஸ்வதந்த்ரேண மயா நோக்தம் தவாபி கலசோத்பவ ||

मुख्यं श्रीमातृनामेति न जानन्ति विमोहिताः ।
विष्णुनामपराः केचिच्छिवनामपराः परे ॥
न कश्चिदपि लोकेषु ललितानामतत्परः । १४५
येनान्यदेवतानाम कीर्तितं जन्मकोटिषु ॥
तस्यैव भवति श्रद्धा श्रीदेवीनामकीर्तने ।
चरमे जन्मनि यथा श्रीविद्योपासको भवेत् ॥
नामसाहस्रपाठश्च तथा चरमजन्मनि ।
यथैव विरला लोके श्रीविद्याराजवेदिनः ॥ १५०
तथैव विरला गुह्यनामसाहस्रपाठकाः ।
मन्त्रराजजपश्चैव चक्रराजार्चनं तथा ॥
रहस्यनामपाठश्च नाल्पस्य तपसः फलम् ।
अपठन्नामसाहस्रं प्रीणयेद्यो महेश्वरीम् ॥
स चक्षुषा विना रूपं पश्येदेव विमूढधीः । १५५
रहस्यनामसाहस्रं त्यक्त्वा यः सिद्धिकामुकः ॥
स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति ।
यो भक्तो ललितादेव्याः स नित्यं कीर्तयेदिदम् ॥
नान्यथा प्रीयते देवी कल्पकोटिशतैरपि ।
तस्माद्रहस्यनामानि श्रीमातुः प्रयतः पठेत् ॥ १६०
इति ते कथितं स्तोत्रं रहस्यं कुम्भसम्भव ।
नाविद्यावेदिने ब्रूयान्नाभक्ताय कदाचन ॥
यथैव गोप्या श्रीविद्या तथा गोप्यमिदं मुने ।
पशुतुल्येषु न ब्रूयाज्जनेषु स्तोत्रमुत्तमम् ॥
यो ददाति विमूढात्मा श्रीविद्यारहिताय च । १६५
तस्मै कुप्यन्ति योगिन्यः सोऽनर्थः सुमहान्स्मृतः ॥
रहस्यनामसाहस्रं तस्मात्संगोपयेदिदम् ।
स्वतन्त्रेण मया नोक्तं तवापि कलशोद्भव ॥

லலிதா ப்ரேரிதேநைவ மயோக்தம் ஸ்தோத்ர முத்தமம் |
கீர்த்தனீயமிதம் பக்த்யா கும்பயோனே நிரந்தரம் ‖ 170
தேந துஷ்டா மஹாதேவீ தவாபீஷ்டம் ப்ரதாஸ்யதி ‖

ஸ்ரீ ஸூத உவாச

இத்யுக்த்வா ஸ்ரீ ஹயக்ரீவோ த்யாத்வா ஸ்ரீலலிதாம்பிகாம் |
ஆனந்த மக்ன ஹ்ருதய: ஸத்ய: புளகிதோऽபவத் ‖

இதி ஸ்ரீ ப்ரஹ்மாண்டபுராணே உத்தரகண்டே ஸ்ரீ ஹயக்ரீவாகஸ்த்ய ஸம்வாதே ஸ்ரீ லலிதா ரஹஸ்யநாம ஸஹஸ்ர பலநிரூபணம் நாம த்ருதீயோத்யாய: ஸம்பூர்ண:

ललिताप्रेरितेनैव मयोक्तं स्तोत्रमुत्तमम् ।
कीर्तनीयमिदं भक्त्या कुम्भयोने निरन्तरम् ॥ १६५
तेन तुष्टा महादेवी तवाभीष्टं प्रदास्यति ।

श्रीसूत उवाच —

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ॥
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत् ।

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्यसंवादे श्रीललितारहस्यनामसहस्रफलनिरूपणं नाम तृतीयोऽध्यायः ॥

DONATED TO
TTO CENTRAL LIBRARY

Published by
R. KRISHNAMOORTHY
for
DHANVANTARI PUBLISHERS
8, NORTON 3RD LANE, MANDAVELI
MYLAPORE, MADRAS

National Art Press, Madras-18